संस्कृतपरिषद्ग्रन्थावली-९.

अ. ७

ओर्गण्टिवंशवर्धनलक्ष्मणाध्वरिकृतम्

सीतारामविहारकाव्यम्

SĪTĀRĀMAVIHĀRAKĀVYAM

THE SANSKRIT ACADEMY
OSMANIA UNIVERSITY,
HYDERABAD-7.

Sanskrit Academy Series, No. 9.
A. 7

SĪTĀRĀMAVIHĀRAKĀVYAM

OF

ORGAṆṬI LAKṢMAṆĀDHVARI

General Editor:

DR. ARYENDRA SHARMA, M.A., D. PHIL.,
Head of the Department of Santkrit, Osmania University,
&
Director, Sanskrit Academy.

Edited by:

D. G. PADHYE, B.A.,
Kāvyatīrtha - Sāhityālaṅkāra,
Editor, Sanskrit Academy, Hyderabad.

THE SANSKRIT ACADEMY,
OSMANIA UNIVERSITY,
HYDERABAD-7.

FIRST EDITION

1962

All copyrights reserved.

First Edition : 1 9 6 2.

Price : Rs. 4.00

PRINTED AT THE OSMANIA UNIVERSITY PRESS, HYDERABAD-7.

Published by:

THE SANSKRIT ACADEMY

OSMANIA UNIVERSITY, HYDERABAD-7, (A. P.)

सीतारामविहारकाव्यम्

अनुक्रमणिका

Introduction	.. ..	I–X
सीतारामविहारकाव्यम्	.. ..	१–९०
प्रथमोऽध्यायः **अयोध्यावर्णनम्**	..	१–७
द्वितीयोऽध्यायः **वर्षर्तुवर्णनम्**	..	८–१४
तृतीयोऽध्यायः **शरद्वर्णनम्**	..	१५–२०
चतुर्थोऽध्यायः **शान्तकन्याविवाहः**	..	२१–२६
पञ्चमोऽध्यायः **वाराणसीवर्णनम्**	..	२७–३५
षष्ठोऽध्यायः **बिन्दुमाधवसाक्षात्कारः**	..	३६–४३
सप्तमोऽध्यायः **विश्वामित्रयागोद्धरणम्**	..	४४–५१
अष्टमोऽध्यायः **सीतावर्णनम्**	..	५२--६०
नवमोऽध्यायः **सीताविवाहः**	..	६१–६९
दशमोऽध्यायः **सीतारामोद्यानविहारः**	..	७०–७५
एकादशोऽध्यायः **पुष्पावचयादिकम्**	..	७६–८३
द्वादशोऽध्यायः **यौवराज्याभिषेकः**	..	८४–९०
परिशिष्टानि	.. ..	९१–११४
१. **वृत्ताविष्कारः**	..	९१–९९
२. **श्लोकसूची**	..	१००–११२
३. **शुद्धाशुद्धसूची**	..	११३-११४

INTRODUCTION

The Sītārāmavihārakāvya is an important contribution of an Āndhra poet to Sanskrit Kāvya Literature and as such deserved to be brought to light by an Institute of Hyderabad. It is, besides, a fine example of the 'Later Mahākāvya' and may be of help in studying the development of this branch of Sanskrit Literature.

Critical Apparatus:

The presnt work has been edited on the basis of six paper manuscripts preserved at the SANSKRIT ACADEMY, Osmania University, Hyderabad. These are as follows :—

(1) No. 67/5:—it contains all the twelve cantos of the text in 42 folios; folios 8-11 and 21-23 and the last six verses of the 12th canto are missing.

(2) No. 67/5A:–it consists of 20 folios containing only the first canto with the commentary, 'Candrikā' of Vaidyanātha Tatsat, without his name being mentioned. The commentary discusses the fourteen varieties of the Upajāti metre and appears to be an improved version of No. (4).

(3) No. 67/6B:–it contains the first eight cantos

of the original text in 20 folios; folios 1-3 are missing.

(4) No. 67/9 :–it has the complete text with the commentary 'Candrikā' of Vaidyanātha Tatsat, in 143 folios. Folios 1–5, 17–32 70–71 and 110 are missing.*

(5) No. 67/11:–it contains only the commentary, 'Tattvaprakāśikā' of Āvasathīya Bhagīratha on cantos 5–11, in 65 folios.

(6) No. 67/4 :– it contains only the fifth canto and four verses of the sixth canto, with the commentary 'Candrikā' in folios 53–68. It is completely worm eaten.

None of the six manuscripts is complete. It was, however, possible to prepare a press copy of the complete text on their basis.

The Author: his life, date and works—

The author is one Lakṣmaṇādhvari, son of Śaṅkara. Both the father and the son are referred to as 'Somayājins' in the colophons to each canto of the present work. The author calls himself 'Orgaṇṭi' which means 'belonging to Orgallu'. Orgallu was the capital of the Kākatīya Empire during the 16th century, now known as Warangal (about 100 miles to the north of Hyderabad in Andhra Pradesh).

---

*See also Madras Catalogue and India Office Catalogue.

Organṭi families are found even today scattered in several villages of the Warangal District.

The author describes himself as an Upāsaka of Medhā-Dakṣīṇāmūrti-Mantra. At the end of the poem (XII–51) he says that he was taught the Dakṣiṇāmūrti-Mantra in a dream and was urged by the deity (Dakṣiṇāmūrti) himself to recite the Dakṣiṇāmūrti-Pañjara ; and that the Sītārāma-vihārakāvya is the outcome of it. The detailed descriptions contained in cantos V & VI indicate that the author must have lived for some time at Vārāṇasī. He also depicts considerable knowledge of the contemporary society. That he was well-versed in Classical Sanskrit Literature is clear from the fact that his work shows extensive influence of the classical poets like Kālidāsa, Bhavabhūti and Śrīharṣa, as well as of Vālmīki. He is also thoroughly familiar with the Telugu classics and folk lore. The influence of the Prabandha type of Telugu literature, which reached its high water mark during the 16th century, is noticeable throughout the poem.

The exact date of Lakṣmaṇādhvari is not known. The lower limit, however, can be fixed, as the dates of the commentators, Vaidyanātha Tatsat and Āvasathīya Bhagīratha are known.

Vaidyanātha Tatsat says in the concluding verse of the Udāharaṇacandrikā, a commentary on

Mammaṭa's Kāvyaprakāśa, that he wrote this commentary in Saṁvat 1740 i.e. 1684 A.D.[1] The other commentator, Āvasathīya Bhagīratīha, is also known to have lived in the 17th century.[2]

Lakṣmaṇādhvari, accordingly, might have lived towards the end of the 16th century or the beginning of the 17th century. This period was the last phase of the Qutub Shahi rule in the Andhra Pradesh. It is well known that Qutub Shahi kings were great patrons and lovers of Sanskrit and Telugu literatures.

Lakṣmaṇādhvari himself mentions, in the colophons to the various cantos of the Sītārāmavihārakāvya, that, in addition to the present work, he was the author of the following works :—

(1) Kaiyaṭa-vivaraṇam (probably an exposition of Kaïyaṭa's 'Pradīpa' on Patañjali's Mahābhāṣya).

(2) Gītarāma–Kāvyam.

(3) Camatkāralaharī.

(4) Gītamaheśvaram.

(5) Saṅgati-lakṣaṇa (according to the commentator Vaidyanātha, a work on Nyāya)

---

1. *History of Sankrit Poetics*, p. 415 (1951) by M. M. Dr. P. V. Kane ; *Sanskrit Poetics* by S. K. De, p. 170 (1960).

2. *A Critical Study of Naishadha* by Dr. A. M. Jani-pp. 33-34 (Baroda, 1957).

None of these works has so far been traced.

The Poem:

The Sītārāmavihārakāvya is a poem of the Mahākāvya type with 720 verses in 12 cantos. It is based on the Rāmāyaṇa and describes the early life of Rāma, closing with the coronation ceremony.

The following is a summary of the contents of the several cantos of the poem :—

Canto I—(Ayodhyā - varṇanam) describes the streets, forts, palaces and gardens of Ayodhyā, as well as its women.

Canto II—(Varṣartu-varṇnam) begins with the description of the solar race and ends with the description of the rainy season.

Canto III—(Śaradṛtu-varṇanam) begins with the description of the Śarat season, then goes on to narrate Daśaratha's despondency at being childless and the advice offered by Vasiṣṭha and Sumantra to perform the Putrakāmeṣṭi sacrifice with the help of Ṛṣyasṛṅga.

Canto IV—(Śāntakanyā-vivāha-varṇanam) narrates the arrival of Ṛṣyasṛṅga in the city

with the help of the apsarasas and his marriage to Śāntā, the daughter of Romapāda.

Canto V—(Vārāṇasī - varṇanam) describes the Purtakāmeṣṭi performed on the banks of Sarayū after the arrival of the entire party at Vārāṇasī.

Canto VI—(Bindumādhava-sākṣātkāra-varṇanam) describes the appearance of Bindumādhava and his assurance to kill Rāvaṇa.

Canto VII—(Viśvāmitra-yāgoddharaṇam) describes the birth of the four sons to Daśaratha; Viśvāmitra's arrival in Ayodhyā and his request to King Daśaratha to send Rāma and Lakṣmaṇa for the protection of his sacrifice.

Canto VIII—(Sītā-varṇanam) contains the description of Sītā by Viśvāmitra and narrates the departure of Viśvāmitra accompanied by Rāma and Lakṣmaṇa to Janaka's capital.

Canto IX—(Sītā-vivāha-varṇanam) describes the breaking of Śiva's bow by Rāma, Janaka's proposal to marry his daughters to the sons of Daśaratha, the latter's arrival from Ayodhyā and the marriages.

Canto X—(Sītārāmodyānavihāra - varṇanam) describes the sports and pleasure trips etc. enjoyed by the newly married couples and the advent of the spring.

Canto XI—(Puṣpāvacayādikam) describes the various sports such as Jalakrīḍā, Udyānasamaya and Madhupāna etc.

Canto XII—(Yauvarājyābhiṣeka-varṇanam) describes the return of the marriage party to Ayodhyā, Rāma's levelling of the pride of Paraśurāma and the performance of Rāma's coronation.

The work is thus a descriptive poem similar to the Telugu Prabandhas where a greater importance is given to description than to the narration.

The Commentators & Commentaries:

Two commentaries of this Kāvya are available. Both of them are by non-Andhra scholars. The commentary 'Candrikā' is by a Mahārāṣṭra scholar Vaidyanātha Tatsat, son of Rāmabhaṭṭa Tatsat.

The same Vaidyanātha is known to have written three other commentaries :—

(1) The 'Prabhā' on the Kāvyaprakāśā-pradīpa of Govinda Ṭhakkura.

(2) The 'Udāharaṇacandrikā' on the illustrative verses of the Kāvyaprakāśa.

(3) The 'Alaṅkāracandrikā' on the Kuvalayānanda of Appayya Dīkṣita. His date as given in the colophon of 'Udāharaṇacandrikā' is Saṁvat 1740 i.e. 1684 A. D.

The second commentary called the 'Tattvaprakāśikā' is by Āvasathīya Bhagīratha, son of Harṣadeva of the Pītamuṇḍi family of Himācala Pradesha. Only part of this commentary (cantos 5–11) is available.

This commentor is known to have written the following commentaries :–(1) The Kumārasambhavaṭīkā, (2) Meghasandeśa Tattvadīpikā, (3) Raghuvaṁśa-Jagaccandracandrikā, (4) Śiśupālavadhāṇīyasī, (5) Kirātarjunīyaṭīkā, (6) Naiṣadhacaritabhāgīrathī, (7) Kāvyādarśaṭīkā.

He is also the author of two minor works, Devīmāhātmyaviyoga and Mahimnastotra. He is said to have lived in the 17th century.

Orgallu, the present Warangal, was a seat of learning from the early days of the Kākatīya Empire till the end of the 17th century and scholars from all over India used to visit this city. This is, probably, how the Sītarāmavihārakāvya, written by a poet living at Warangal, became popular in other parts of India and attracted scholars like these two commentators. Or, perhaps, the poem was written at Kāśī and became known to scholars visiting that centre of Sanskrit learning. That the

author had lived at, or at least visited, Kāśī is borne out by the internal evidence.

Influence of classical writers on the poem :

There is abundant evidence to show that the author has been deeply influenced by the works of Vālmīki, Kālidāsa, Bhavabhūti and Śrīharṣa.

By way of illustration, the following comparisons will suffice :—

Canto	I	verse 1–	cf Kumārasambhava		1. 1.
„	VI	35–36	cf	„	VI. 25. 55.
„	X	52	cf Raghu	XI. 60.	
„	VIII	31	cf Naiṣadha	II. 40.	

Influence of Telugu Literature & Folklore:

The influence of Telugu literature and folklore is also noticeable in the poem. The following instances may be of interest :—

(1) The reviling of the moon (X. 39) bears a resemblance to *Vasucarita* (V. 27), a Telugu classic by Rāma Rāja Bhūṣaṇa.

(2) The description of Sītā as a Mugdhā (X. 39. 42) is comparable to the Telugu folk song "Sītādevī Ānavālu".

(3) The moat around the city of Ayodhyā (1.12) is described as a Pādakaṅkaṇa which is a gold anklet called "Gaṇḍapeṇḍaramu" in Telugu.

(4) The sweetmeats mentioned by the author (4. 34) have been described by the commentators as peculiar to Andhra Pradesh.

(5) The verse 9. 43 describes the Daśāvatārābhinaya which is a special type of dance prevalent in the Andhra Pradesh.

The influence of Telugu poets is also found in the metres used in this poem. Sanskrit writers generally use only one metre throughout a canto, but in the Sītārāmavihārakāvya, as in all the Telugu poetical works, the author has used a variety of metres in each canto.

The Dāma Yamaka (i.e. repetition of certain letters in each line of a verse) seems to have been used in the various Stotras found in the fifth canto of the poem.

The editors gratefully acknowledge the help rendered by Dr. B. Rama Raju, M.A.PH.D., *Reader in the Department of Telugu, Osmania University, Hyderabad, for supplying material for this introduction.*

श्रीगणेशाय नमः

लक्ष्मणाध्वरिकृतं

सीतारामविहारकाव्यम्

प्रथमः सर्गः

अयोध्यावर्णनम्

१ अस्ति प्रशस्ताखिललोकभूषा विभूषितद्वादशयोजनैषा ।
विशुद्धभावैर्विनिविष्टमध्या विराजमाना विबुधैरयोध्या ॥

२ भवत्ययोध्यारिजनैरयोध्या कल्याणराध्या कलुषैरबाध्या ।
पुरीं समानीय पुरन्दरस्य भूमौ विधात्रा विनिवेशितेव ॥

३ मेधामनुं संविनिवेश्य काव्ये बोधाय मेधारहितान्तराणाम् ।
आदावयोध्यास्तुतिपूर्वमत्र श्रीरामचन्द्रस्य विहारमीडे ॥

४ अहं महासाहसिकोऽस्मि नूनं यतस्त्वयोध्यापुरवर्णनेच्छुः ।
कथं विना साहसमत्र लोके भद्राणि पश्यन्त्यथ वा कवीन्द्राः ॥

५ व्यासस्थं न वेदान् न चतुर्मुखोऽहं न वा गुरुर्नैव फणाभृदीशः ।
कथं त्वयोध्यापुरवर्णनाय दक्षो भविष्यामि दरं विनैव ॥

६ तथापि लक्ष्मीशकृपाकटाक्षवीक्षानुलब्धां मतिमादधानः ।
विचित्रवृत्तस्य विचित्रवृत्तैः पुरस्य शोभामनुवर्णयिष्ये ॥

७ या वर्णिता संश्रितकामधेनुः मुक्तिप्रदानामपि चाग्रगण्या ।
दत्त्वैहिकामुष्मिकयोः समृद्धिं कथं कृतार्थं भुवि मां न कुर्यात् ॥ ७

८ अखण्डभूमण्डलमध्यवर्तिकवीश्वराणां करवाणि यात्राम् ।
मदीयकाव्ये मतिमद्भिभाव्ये सुखेन दोषो यदि शोधनीयः ॥ ८

९ वैषम्यवैरस्य विषाददग्धबुद्धीनभाग्यान् प्रति नैष यत्नः ।
जयन्तु ते सत्कवयः कवित्वरहस्यसर्वस्वविदोऽवनौ ये ॥

१० आदर्शमाणिक्यतलोपरि स्वं शीर्षं त्वधस्ताद् विनमय्य सम्यक् ।
या स्वीयसौन्दर्यविलोकनार्थं कृतानुबिम्बं स्वरिवावभाति ॥

११ यामामनन्त्यन्यपुरैरयोध्यां सौन्दर्यतोऽन्येऽरिजनैरयोध्याम् ।
केचित् तथा पापजनैरयोध्यामपीतरे पुण्यजनैरयोध्याम् ॥

१२ ये मामुपाश्रित्य वसन्ति सर्वे जना इहामुत्र च पालनीयाः ।
इतीव बद्धं परिघाच्छलेन पादे यया कङ्कणमाविभाति ॥

१३ यस्यै वरः सत्पुरुषेण दत्तः श्रीरामचन्द्रेण निजाश्रितानाम् ।
मुक्तिं प्रयच्छेति तदन्यथा चेच् छ्रेयः पुरीणां कथमग्रगण्या ॥

१४ यस्याः सकाशादधरा अभूवन्नौन्नत्यसौन्दर्यपवित्रताभिः ।
सर्वा नगर्यश्च तदेव सत्यं कर्तुं प्रवृद्धा ह्यनु सप्तलोकम् ॥

१५ उदग्विभागे सरयूरपारगभीरनीरा भुवनैकसारा ।
यस्यास्तु पूर्वापरमाननार्थं प्रमाणसूत्रं भवतीति भाति ॥

१६ गजाः कुतश्चित् तुरगाः कुतश्चिद्
रथाः कुतश्चिच् च भटाः कुतश्चित् ।
मार्गात् प्रधावन्ति दिने दिनेऽपि
रथ्यासु यस्यां किल राजधान्याम् ॥

१७ यस्मिन् पुरे कुङ्कुमगन्धसारविलेपनोद्भासितबाहुदण्डाः ।
विकोशखड्गापरनामधेया भटाः समन्ताच् च समुल्लसन्ति ॥ १७

१८ यदीयसौधीयसहस्रशृङ्गसंवद्दृष्टस्रुतमण्डलस्य ।
सुधाकरस्यैव सुधाभिरासन् सौधानि शुभ्राणि न चूर्णसंगात् ॥१८

१९ यत्सौधशृङ्गाग्रसमर्पितस्य रत्नाङ्कुरोद्यत्कलशस्य दम्भात् ।
आभाति भानुर्दिनरात्रिभागविभागबोधे विशयं वितन्वन् ॥

२० यत्रोच्चहर्म्याग्रगरत्नसूर्या लोकेन चन्द्रानवभासनेऽपि ।
स्रवत्पयोभिः शशिकान्तजालैर्निश्चीयते रात्रिरुपागतेति ॥

२१ यद्गेहनानाविधतुङ्गशृङ्गप्रोद्यन्मणिद्योतितकुम्भसूर्यैः ।
अनेकसंख्यैरपि कोटिसूर्यगाथा यथार्थाऽन्वहमीक्ष्यते स्म ॥

२२ पूर्वस्थिताः पश्चिममध्यदेशस्थिताश्च सर्वे प्रविबुध्य रात्रौ ।
यत्सौधशृङ्गे मणिसूर्यभानात् सन्ध्या यथायोग्यमुपक्रमन्ते ॥

२३ यदीयरथ्यासु च चन्द्रकान्तमार्ताण्डकान्तैर्विनिबद्धभूमिः ।
हेमन्ततत्प्रान्तवसन्तकालग्रीष्मेषु सौख्येन विहारयोग्या ॥

२४ चित्रं यदुद्यानपरम्परासु पुष्पाणि नानाविधसौरभाणि ।
चिन्वन्ति देवा वनपारिजातपुष्पैः समं तत्करसुग्रहाणि ॥

२५ अनाश्रयव्योमविहारखिन्ना मार्ताण्डवाहाः महनीयदेहाः ।
यदुच्चसौधोपरिभूमिकासु विश्रम्य विश्रम्य पुनः प्रयान्ति ॥

२६ सूर्याश्वविश्रान्तिविधिं विचिन्त्य यत्सौधजालं कृतवांस्तदर्थे ।
अन्योन्ययोग्यार्थविधानदक्षं विधिं वृथा वेदजडं वदन्ति ॥

२७ यदीयहट्टे विशदांशुकानां बुधा जनानां व्यतिवर्तनेन ।
सुदूरघोषेण च पूर्णिमायाम् चन्द्रोदये सिन्धुमनुस्मरन्ति ॥

२८ विशुद्धनानाविधरत्नबद्धस्तम्भेषु हर्म्येष्वनुबिम्बदेहाः ।
द्वित्रा अदृश्यन्त सहस्रसंख्याः पृथग्जनानामपि यत्र चित्रम् ॥ २८

२९ क्रीडानगाग्रार्पितरत्नकुम्भसूर्यप्रभाभीत इवान्धकारः ।
यत्रेन्द्रनीलैरनुबद्धहर्म्यगर्भेषु लीनः प्रतिभाति नूनम् ॥ २९

३० प्रासादशृङ्गप्रतिनद्धरत्नभानुप्रभाधूतमहान्धकारः ।
दिग्भ्यः समागत्य महेन्द्रनीलहर्म्यच्छलेनाश्रयतेऽस्य भूपम् ॥

३१ रत्नप्रभाधूतमहान्धकारं यत्रेन्दुनीलोच्चगृहं निवेश्य ।
स्वकीयगर्भे शरणं भवत् सत् तदादि तन्नाम जगाम नाम ॥

३२ प्राकारशृङ्गोपरिविद्यमानक्रीडाकुरङ्गोऽमृतवाञ्छयेन्दोः ।
प्रविश्य बिम्बेन समागतोऽत्र माधुर्यतो वाऽतिजवेन वाऽस्य ॥

३३ यत्सौधवातायनवर्तिकान्तामुखस्वरूपद्विजराजपङ्क्तौ ।
लावण्यभिक्षां कुरुते कराग्रैस्तथापि शून्योदर एव चन्द्रः ॥

३४ चन्द्रः कलङ्कीति निरस्यते वाथवाऽस्य तुन्दे वडवानलो वा ।
यत्सौधकान्तामुखचन्द्रशोभाभिक्षाटनेऽप्यस्य न तुन्दपूर्तिः ॥

३५ सुधागृहैरुज्ज्वलसर्वकायं कण्ठे नभःकालिमसंविलीढम् ।
मन्दाकिनीसेवितमस्तकं यत् पुरं महादेव इवावभाति ॥

३६ मेघं समारुह्य विहारिणीनां विमानमारुह्य विहारिणीनाम् ।
यत्रोच्चसौधस्थविलासिनीनां स्वर्गाङ्गनानामपि नास्ति भेदः ॥

३७ घरट्टशब्दैर्घनगर्जितैश्च भेरीनिनादैरपि सार्वकालम् ।
नृत्यन्ति केका ध्वनिपूर्वमत्र कलापविस्तारकरा मयूराः ॥

३८ यत्रोल्लसच्छुभ्रपयःप्रपूर्णपर्यन्तभास्वत्परिखाच्छलेन ।
समागतः किं पयसां समुद्रः श्रीरामसेवाविधिसावधानः ॥

३९ कवाटदन्तच्छदलग्नलोहशङ्कुच्छलेनातिकरालदन्तम् ।
द्वारं यदीयं खलु मृत्युवक्त्रं व्यात्तं विशालं रिपुजक्षणाय ॥ ३९

४० यामेत्य दारिद्र्यभयाद् विमुक्ता अन्तर्बहिः शत्रुभयाद् विमुक्ताः ।
सर्वेऽपि संसारभयाद् विमुक्ताः केन प्रकारेण तु मुक्तिदा न ॥ ४०

४१ प्राकारसौवर्णसहस्रशृङ्गजुष्टा सती या नगरी विभाति ।
यथैव जाम्बूनदपादराजिविराजमानः परितः सुमेरुः ॥

४२ यदीयसौधाग्रनिविष्टकान्तामुखद्विजेन्द्रावलिसंसदस्तु ।
प्रदक्षिणं याति जलार्द्रगात्रः कलङ्कदूरीकरणाय चन्द्रः ॥

४३ यत्राङ्गनावारिविहारकाले कुचच्युतं कुङ्कुमगन्धवृन्दम् ।
संगात् सरय्वाः सततं वहन्तीं गङ्गां विलोक्याम्बुनिधिः शशङ्के ॥

४४ केलीगृहस्तम्भनिबद्धशुद्धरत्नाङ्कुरोद्यद्रमणीयभासः ।
वधूवराणां रतिकेलिहासान् विडम्बयन्तीव विभाति यत्र ॥

४५ यत्सौधबद्धध्वजवातधूतसुनीलशाटीच्छलसूर्यकन्या ।
मन्दाकिनीस्पर्शमवाप्य चित्रं दिवि त्रिवेणीभ्रममातनोति ॥

४६ यत्सौधशृङ्गार्पितशुद्धरत्नप्रभासमुद्दीप्तदिगन्तराले ।
पयोजकोशैः खगमीलनैरप्युन्नीयते रात्रिरिति प्रसिद्धिः ॥

४७ आदर्शमाणिक्यगृहेऽनुबिम्बान् सुतस्य दृष्ट्वा प्रजहर्ष काचित् ।
अनेकपुत्राऽस्म्यहमित्यथाऽस्य जायाऽनुचिन्तावशमागताऽत्र ॥

४८ यत्रामरोद्यानवनप्रसूनपरागपुञ्जाकलिताग्रदेशान् ।
सौधानुपारुह्य सुराङ्गनानां कान्ताः स्वकान्ताचरितं वदन्ति ॥

४९ यस्मिन् पुरे निर्जरनाथरत्ननिनद्धहर्म्याग्रनिवासिनीनाम् ।
मुखारविन्दानि निरीक्ष्य हेतुं तमाश्रयासिद्धमसिद्धमाहुः ॥

५० अनारतं यत्र बुधैर्महेन्द्रः सन्तर्प्यमाणस्तुतिशस्त्रमन्त्रैः ।
हविर्भिराज्यादिभिरध्वरेषु चिरं विसस्मार वरं स्वराज्यम् ॥ ५०

९१　यत्रामरेन्द्रावसथोपमाने पुरेऽमराणामपि माननीये ।
विश्वावनोत्पत्तिविधायिलक्ष्मीनारायणो दाशरथिर्बभूव ॥ ९१

९२　यत्र क्रीडानगोद्यन्मरकतमणिसंरूढकान्तिच्छटानाम्
व्याजेनाधित्यकासूत्थितहरिततृणग्रासहेतोर्विलङ्घ्य ।
यान्त्यग्रे सूर्यवाहा अथ हरितगुणाः कारणप्रक्रमेण
द्राग् जायन्ते च तस्मादुदगयनगतान्येव दीर्घाण्यहानि ॥

९३　चित्रं यत्र प्रमुग्धा बहुतरखदिराङ्गारबुद्ध्या मणीनां
सङ्घं निक्षिप्य चुल्यां तदुपरि कलशे चन्द्रकान्तावनद्धे ।
तोयं जालान्तरालस्थितशशिकिरणैर्वर्धमानं हि रात्रौ
दृष्ट्वा पाकार्थमेतत् कलशगतजले तण्डुलान् प्रक्षिपन्ति ॥

९४　यत्र क्रीडागिरीणामुपरि विरचितारत्नशृङ्गोत्तमाङ्गा
भास्वत्क्रीडाकुरङ्गा विसृमरकिरणैर्धातुभिर्निर्मिताङ्गाः ।
जग्ध्वा तत्रत्यगारुत्मतमणिविगलत्कान्तिदूर्वाङ्कुराग्रं
पीत्वा हीराङ्कुराच्छद्युतिकपटजलं संचरन्तीव चित्रम् ॥

९५　उद्याने यत्र दोलाशतपरिकलिते ग्रीष्मकाले तरुण्यः
स्वैः स्वैः कान्तैः समेताः शिशिरतरुतले पुष्पजालैर्विकीर्णाः ।
कासाराम्भःकणार्द्रैर्मलयजपवनैः शेरते वीज्यमानाः
किं न्यूनं धार्मिकाणामिह तदुपरि चामुत्र लोके सुखानाम् ॥

९६　व्याघ्रैर्गावः समेता भयपरिरहिताः सारवाम्भः पिबन्ति
प्रोद्यन्मण्डूकजालं बकबककरवणैः सर्पसङ्घे प्रयाति ।
कीचीकूचीति वाचा वदति च कुशलं कौशिकः काकवृन्दं
यत्रास्ते मुक्तिपुर्यां मुनिजनवसतेस्तुल्यता तद् विचित्रम् ॥९६

५७ यस्याः प्राकारबाह्यप्रविततपरिखाभामिनीशीतलान्तः –
प्रोत्फुल्लाम्भोजवक्त्रा कनकमयलसच्चक्रवाकस्तनाढ्या ।
प्रत्युद्यन्मीनलोलोत्पलदलनयना कूलभास्वन्नितम्बा
कादम्बालापलीला कलकलवचना सर्वदा शोभते स्म ॥ ५७

५८ प्राकारकाञ्चीपरिघादुकूला द्वारोन्मुखी वीथिविशालगात्री ।
कल्याणदा केलिगिरिस्तनाढ्या सदास्त्वयोध्या शुभदा प्रसिद्धा ॥

५९ अलमस्य महागुणाभिधाने प्रथमं मत्कृतयत्नसाहसेन ।
क्व नु सागरपारवर्तिरत्नं क्व नु सर्वस्य तदीयलाभवाञ्छा ॥ ५९

ओर्गण्टिवंशवर्धनलक्ष्मणयज्वप्रणीतकृतिवर्ये ।
सीतारामविहारे प्रथमः सर्गोऽगमन् महाकाव्ये ॥१॥

इति श्रीओर्गण्टिशंकरसोमयाजिसुतलक्ष्मणसोमयाजिकृतौ
श्रीसीतारामविहारे महाकाव्ये
अयोध्यापुरवर्णनं नाम प्रथमः सर्गः ।

———:०:———

द्वितीयः सर्गः

वर्षर्तुवर्णनम्

६० सेतुशीतनगयोरिह ताद्दङ्मध्यभूषणमणिं महनीयम् ।
पट्टणं परमकारुणिकोऽसौ धर्मतो दशरथः प्रशशास ॥ १

६१ तत्पुरातनधराधिपवंशं वर्णये वचनशोधनहेतोः ।
शाश्वतो भवति यः परमेष्ठी तस्य सूनुरजनिष्ट मरीचिः ॥

६२ कश्यपोऽस्य तनयस्तु विवस्वांस्तस्य तस्य तनयो मनुरासीत् ।
धर्मशास्त्रमखिलं भुवि सर्वे मानवं खलु वदन्ति मनुष्याः ॥

६३ तत्क्रमक्रमगतानि धरित्रीपालनाय बहुराजकुलानि ।
जज्ञिरे सगर इत्यनु तेषां चक्रवर्तिपदमाप महीपः ॥

६४ तस्य सूनुरसमंज इहाऽभूद् विश्रुतोऽशुमत एष हि तातः ।
अंशुमत्तनयतां प्रतिपेदे यो दिलीप इति विश्रुतकीर्तिः ॥

६५ तस्य वंशजनितो रघुरासीद् राघवा इति कथा यत एव ।
तस्य गोत्रजपुमान् अजनामा विश्वयोनिरज एव हि साक्षात् ॥

६६ तस्य सूनुरभवद् रविवंशालंकृतेर्दशरथो दययार्द्रः ।
क्षीरसागरसुतः सुधयार्द्रश्चन्द्रमाः स तु निरस्तकलङ्कः ॥

६७ तेन दिग्विजयसव्यसनेनानेकवारमहिताः परिभूताः ।
अष्टदिग्विजयसंभृतवित्तं सप्ततन्तुषु सकृद् विनिमुक्तम् ॥ ८

६८　विश्वजिन्मुखमखेषु बुधेभ्यो भूरिदानकरणेन कृशस्वः ।
वह्निमुख्यबुधसाद्विहितस्वश्चन्द्रमाः प्रतिपदीव विरेजे ॥ ९

६९　लोकबन्धुकुलजं किल लोकः स्वामिनं दशरथं समवाप्य ।
पद्मबन्धुमुदयं प्रतिपत्रं पद्मजालमिव भूरि चकाशे ॥

७०　अङ्गपञ्चकमनु त्रिगणोऽपि स्पर्धमान इव तं भजते स्म ।
स्वामिसत्त्वशरणानुगतानां नास्ति हि प्रबलदुर्बलभावः ॥

७१　मित्रशात्रवगतं महदागः स्वल्पमप्यधिजगाम यदा सः ।
तद् विमार्ष्टुमनुशप्य वसिष्ठे तिष्ठते स्म तदपाकुरुतेऽथ ॥

७२　षड्गुणा इह वसन्ति न वेति द्वापरं कथमुपैतु मतिर्मे ।
वेद्म्यनन्तगुणसंभृतमूर्तौ न्यायतोऽत्र किल तेऽपि वसेयुः ॥

७३　इन्द्रसंसदि जगाम किलासौ राक्षसोन्मथनदत्तसहायः ।
तेन राज्यपरिपालनरीतौ शिक्षितो दशरथः स विभाति ॥

७४　इन्द्रवह्निमुखलोकगता ये ते प्रसारितकराः शिशिरर्तौ ।
यत् प्रदग्धरिपुपट्टणवह्निज्वालया व्यपनयन्ति हि शीतम् ॥

७५　अष्टमन्त्रिवरमुख्यसुमन्त्रे राज्यभारमखिलं विनिवेश्य ।
प्रस्थितो दशरथो धृतचापः सत्त्ववान् समितिदिग्विजयाय ॥

७६　मन्त्रिवर्यमुपनीय समाजे भावगौरवयुतं वच ऊचे ।
नादयन्नखिलमण्टपमध्यं स प्रतिध्वनिभिरम्बुदनादः ॥

७७　हे सुमन्त्र कलयावहितः सन् शाधि राज्यमखिलं कृतकृत्यः ।
सावधानमतिहीनजनेशं शात्रवस्तु विवरे प्रहरेयुः ॥

७८　अल्पभूतिसुहितं जननाथं भूरिभूतिसहितं ज्वलनं च ।
निर्विशङ्कमखिला ननु लोकाः स्कन्दनेन लघुतां गमयन्ति ॥ १९

७९ चारचक्षुरपि दूतमुखः सन् सारमन्यनरनायकगूढम् ।
बाढमाकलय भूतभविष्यद्वर्तमानमुचितं कुरु यत्नम् ॥ २०

८० शत्रुमित्ररिपुमित्रमुखानां सामदानपरिभेदनकारी ।
दण्डमप्यरिषु चेद् विनियुङ्क्ते दीप्यते रविरिवात्र धरेशः ॥

८१ पश्य चण्डकिरणस्य कदाचित् प्रेक्षणं च खलु कर्तुमशक्यम् ।
शीतभानुजठरं शशकोऽसौ प्राप्य तं किल कलङ्कपतीन्दुम् ॥

८२ त्वं विशिष्य सुहृदो मम बन्धून् सापदानमनुजीविकुलं च ।
मानयस्व बहुनोचितकारी नाश्यते निजजनैरपि रोषात् ॥

८३ कीचका बत परस्परतः स्वघर्षणेन कुलमेव दहन्ति ।
आत्मनाशमपि नो परनाशं जानते परुषवर्षणरुष्टाः ॥

८४ इत्थमुक्तवचने सति राजन्याददे गिरमुदारगभीराम् ।
मन्त्रिशेखरमणिः किल वाचां शोभते समय एव विलासः ॥

८५ लोकनाथ तव तेजस एव स्वास्थ्यमेति जगदुज्ज्वलकीर्ते ।
सेवके मयि कृपां कुरुषे यद् भाषसे किमपि गौरवबुद्ध्या ॥

८६ यत्र कुत्रचिदपीह वस त्वं तेजसा विनिहता रिपवस्ते ।
चण्डभानुमनुधावति पश्चात् किं तमः प्रतिदिशं विनिहन्तुम् ॥

८७ इत्युदीर्य विरराम सुमन्त्रः प्राञ्जलिर्विनयसूचकचेष्टः ।
स्वामिसन्निधिगतानुचनायां भूषणं हि मितभाषणमेव ॥

८८ तं विसृज्य नरनायकमौलिः चालयत्यनुदिशं नयने स्म ।
दानवाभिगमने निजसैन्ये सर्वतो नयनजालमिवेन्द्रः ॥

८९ हस्तिवाजिरथवीरभटास्तं धावनेन परितः परिवव्रुः ।
पर्वतोपरि मृगेन्द्र इवासावारुरोह रथमिद्धवरूथम् ॥ ३०

९० वैरिवृद्धिमभितो विनिशम्य ग्रीष्म एव निरियाय महौजाः ।
लौकिका इतरथानुपपत्तिं सर्वतो बलवतीं हि वदन्ति ॥ ३१

९१ भूरिसैन्यपदवद्दनतुन्नप्राज्यधूलिपटलावृतमानः ।
स्वप्रतापविभवेन तदीयं सप्रतापमवरुध्य जगाम ॥

९२ नागराननुगतान् परिहाप्य प्राप्य जानपदभूर्युपधाश्च च ।
काननानि परितः परिभेद्य प्राप सागरसमीपपुराणि ॥

९३ केचन प्रमथिताः करवालैः केचनानतिपरा रिपुवर्याः ।
दुर्गभूमिषु बलस्य निधानात् तेन युद्धमपि चक्रुरथान्ये ॥

९४ आत्मनीनरथरत्ननिविष्टैः शत्रुपार्थिवरथप्रतिबिम्बैः ।
एकमेव रथमाश्रित आजावेष किं बहुसहस्ररथोऽभूत् ॥

९५ शत्रुवक्त्रपरिदष्टतृणोच्चैः संचयेन परिपूरिततुन्दाः ।
युध्यतोऽस्य दिवसेऽपि च रात्रावाद्रवन् किल पुरो रथवाहाः ॥

९६ आशया गिलितभूरिधनान्नारब्धरोगहरणोचितवान्त्यै ।
यत्प्रतापमधिगत्य रिपूणामौषधान्तरमहो न हि भोज्यम् ॥

९७ संजिगाय समदृष्टिरहोन्तः शत्रुसङ्घमिव बाह्यरिपून् सः ।
दुष्टनिग्रहणमप्यविशिष्टं शिष्टपालनमिव प्रभुचिह्नम् ॥

९८ एवमष्टहरितां विजयेनापेक्षिता नवधिकोशभरेण ।
संभृतः समगमन् महनीयं मन्दिरं दशरथो मघवेव ॥

९९ मन्दुरार्पितमहोन्नतवाहं मन्मथाक्रमणसंयुतदेहम् ।
न्यस्तकार्मुकवरं नरनाथं प्रस्तुतागतगतावनिनाथम् ॥

१०० अष्टदिग्विजयसंभृतकीर्तिं हृष्टपुष्टबहुसुन्दरमूर्तिम् ।
ऊर्ध्वदिग्विजयहीनतयेमं जेतुमुज्ज्वलधनुः प्रविसार्य ॥ ४१

१०१ गर्जितप्रकटतूर्यनिनादैर्मेदिनीनिखिलतापनिरासैः ।
उन्मुखाभिनिपतद्द्विजसंघप्रार्थनाभ्यधिकजीवनदानैः ॥ ४२

१०२ वैद्युतद्युतिदिगन्तविसारिस्वप्रतापततिभिश्च पयोदः ।
प्रादुरास किल सत्पथवर्ती स्पर्धमान इव पङ्क्तिरथेन ॥

चतुर्भिः कालापकं —

१०३ नैल्यमापमुखतः स्तनयित्नुर्भूपतेर्निजपराजयचिह्नम् ।
रूपमेव महिमानमिहास्याचष्ट एतदपि च श्रुतिसिद्धम् ॥

१०४ चित्रमत्र जलदैरपि संपच्चातुरी कथमशिक्षि कुतो वा ।
चक्रिरे बहुरजोभरवाताः प्रस्तरप्रहरणैर्वनभङ्गम् ॥

१०५ संगरेषु बहुधा रथवाहाः श्रान्तिमापुरिति वा किमु वृष्टौ ।
उन्नमय्य वृषभा निजशृङ्गाण्याद्रवन् जलधरैरिव योद्धुम् ॥

१०६ हस्तिनोऽपि परितो निजशुण्डादण्डताडनवशेन विशीर्णान् ।
अम्बुदान् व्यरचयन् जलधारा बाणवृन्दविवरे प्रविशन्तः ॥

१०७ केलिभूमिधरमेव नराणां नायकं किमु करिष्यति वाब्दः ।
निर्झराच्छवरचामरमभ्रच्छत्रमेनमभिषिञ्चति स स्म ॥

१०८ कान्तिनिर्झरधराः कलितान्ताः प्राप्नुयां प्रथममित्यभियान्त्यः ।
सागरं शतसपत्न्य इवेशं निम्नगा अतिजवेन समीयुः ॥

१०९ इन्द्रगोपपरिचित्रितमध्या शाद्वलप्रचुरभूः प्रचकाशे ।
गात्रवेष्टितशुकप्रभलाक्षा बिन्दुसिक्तवसना रमणीव ॥

११० वर्षकालमिषकामुकनीतं नूतनोपहरणं वनलक्ष्म्याः ।
भासते स्म वरविद्रुममाला भूरिभासुरकदम्बसुमालिः ॥ ५१

१११ हर्षयत्यवनिपः समदृष्टिः कर्षयत्युरुघनः समवृष्टिः ।
इत्यनुश्रुतिवशात् किमु वर्षः दन्तुराणि च समानि चकार ॥ ९२

११२ केतकीदलमहो प्रचकाशे पाण्डुगण्डतुलितं विरहिण्याः ।
मन्मथस्य करपत्रमिवालं मर्मभेदनकरं पथिकानाम् ॥

११३ गाढं घनालिङ्गितसर्वगात्रा प्रभाकरस्पृष्टपयोधरा द्यौः ।
अधोम्बरेऽलं प्रविभक्तरागा बभूव सन्ध्यासु रजस्वलेव ॥

११४ निश्वासोपहित इवोरुगन्धवाहैः सन्ध्यायामरुणिमचन्दनोक्षिताङ्गः ।
शुभ्राभ्रैरधितनु पाण्डुतां गतोऽसावाकाशः समभृत कामुकस्य वेषम् ॥

११५ घनतुङ्गविभङ्गरञ्जिता द्यौः हिमवच्छृङ्गवृतान्तरान्तरेव ।
प्रबभौ जलधिप्रदेशवच्च च प्रविभक्तैः परितोऽन्तरा महीध्रैः ॥

११६ बभौ नभोमध्यगता बलाकापङ्क्तिर्विनीलस्य घनाघनस्य ।
वर्षर्तुलक्ष्मीरमणस्य कण्ठे मालेव लोला किल पौण्डरीकी ॥

११७ द्विरेफगीतैश्च मयूरनृत्तैः समन्विताः सामजकर्णतालैः ।
मृदङ्गनादैर्घनगर्जिताख्यैर्नृत्यन्ति विद्युल्ललना हरित्सु ॥

११८ अश्वत्थपर्णाग्रविलम्बिबिन्दुजालं विशालं वनदेवतायाः ।
वितानशाटीविनमद्वलीकपर्यन्तमुक्तावलिमेव मन्ये ॥

११९ कादम्बिनी धृतवनी नवभासगर्भं
　　प्रासूत दर्दुरदृषत्पविराजिलादीन् ।
स्त्रीणां समस्तविभवैरपि वर्धितानां
　　सत्संततिर्भवति पुण्यफलं विना न ॥ ६०

१२० जम्बूकदम्बकुटजार्जुनबाणपूग –
केतक्यगस्त्यतिलकालकुचैः समेताः ।
स्वैः स्वैः फलैश्च कुसुमैरुपधाभिरग्र –
शाखार्पिताभिरनुजीवनदं विनम्राः ॥ ६१

१२१ इत्थं क्वचिद् गमनमागमनं विधातुं
नोदब्रवीत् सुवदनाकुचदुर्गभूमौ ।
प्रापय्य सर्वजनता ननु धूमयोनिर् –
आक्रम्य राज्यमखिलं तमसा ववार ॥

१२२ मुखतस्तृणमादधावसा --
वपि गर्जन् पतितोऽप्यभिद्रवन् ।
इति पङ्क्तिरथो विचिन्तयं
स्तमुपेक्षाविषयं चकार सः ॥

१२३ भूनायके कनकवर्षिणि वारिवर्षी
गर्जन् मृषेव जलदो जनिताभिमानः ।
मासैश्चतुर्भिरपि रिक्तसमस्तकोशो
मौनेन मन्दमगमत् परिपाण्डुवर्णः ॥

१२४ मेघचारणमयूरकराणां नादबृंहितविनर्तनवेगाः ।
शान्तिमापुरवनिनटशून्यो नाट्यरङ्ग इव मौनमवाप ॥ ६९

ओर्गण्टिलक्ष्मणाध्वरिकृते सीतारामशोभनविहारे ।
कैयटविवरणमोदरकाव्ये व्यगमद् द्वितीयः सर्गोऽयम् ॥२॥

इति श्रीओर्गण्टिकविश्रीशंकरसोमयाजिसुतलक्ष्मणसोमयाजिकृतौ
श्रीसीतारामविहारे महाकाव्ये
वर्षर्तुवर्णनं नाम द्वितीयः सर्गः ।

—:0:—

तृतीयः सर्गः

शरद्वर्णनम्

१२५ अथ मृष्टसान्द्रतरपङ्कतया परिवृद्धभूवलयसस्यफला ।
स्वसमुद्भवेन जगतः सुखदा शशिनः कलेव शरदाववृधे ॥ १

१२६ रथवाजिभूरिकरिवीरभटा गमनानि चक्रुरवनौ सुखतः ।
घनदुर्दिनान्यपगमय्य यथा प्रतिभूपरोधनविमोचनतः ॥

१२७ कमलं बभौ कमलभास्यमलं गगनं घनापगमनाद् विमलम् ।
कुमुदान्युडुप्रतिनिधीनि बभुर्भुवि राजहंस इव चन्द्रमसः ॥

१२८ उरुतारहाररुचिरा क्षणदा वरचन्द्रिकोत्तमदुकूलधरा ।
कविनासिकाभरणसंवलिता वनितेव चन्द्रवदना शुशुभे ॥

१२९ परिपाण्डुदेहवरकण्टकिनः शिरसः सदा विनमने निपुणाः ।
नयनोत्सवस्य जनने चतुराः कउमा बभुर्विरहिणीसदृशाः ॥

१३० जलनिर्गमेन वरनिर्झरिणीपुलिनं क्रमात् प्रकटयन्त्यमलम् ।
नवसंगमे कुलवधूः शनकैः जघनप्रकाशनपरेव बभौ ॥

१३१ कलहंसजालमपि मानसतः पुनरागतं क्षितितलं शरदि ।
नृपघाटिकासु दिगुपान्तगता जनता स्वदेशमिव जानपदा ॥

१३२ कनकप्रभं पृथुकपित्थयुगं मृगनाभिवद्घुमघुमत्सुरभि ।
अपनीतकञ्चुकमुन्नतिमत् तरुणीस्तनद्वयमिव प्रबभौ ॥ ८

१३३ पशुवृन्दमध्यगकुटीरगता दधिमन्थनाकलितबाहुलताः ।
स्तनचालनेक्षणविलोलदृशः पशुपाङ्गना इव बभुश्चपलाः ॥ ९

१३४ प्रविसारिदोहदजधूमधयान्यधिशाखलम्बनमधोमुखतः ।
कलितानि दाडिमफलानि बभुः मुनिबालका इव तपोनिपुणाः ॥

१३५ पृथुचक्रवाककुचभारभृतां सलिलान्तरोल्लुलितमीनदृशां ।
सरितां गतान्यलसतामगमन् सुरतान्ततान्तसुदृशां तुल्या ॥

१३६ तुरगानुपारुरुहुरश्वगतिक्रमवेदिनः करगृहीतकशाः ।
घनवात्यया प्रतुलितं भ्रमणं विनयन्ति तत्पदतले स्म ततः ॥

१३७ वयसा विशीर्णवनकञ्चुकभृद्विवरेषु लोहितनखाङ्कयुतम् ।
तरुणीवनस्तन इवोपचितं कनकाभदाडिमफलं ददृशे ॥

१३८ शरदः श्रियं समवलोकयते परितो रसादुपवने स्म गतः ।
नृपतिः स्वकीयवनपालजनैः परिदर्शितां प्रतिदिशं च मुहुः ॥

१३९ जननाथ पश्य कलहंसगणं वरपुण्डरीकवनमध्यगतम् ।
कलभाषणेन विदिता हि भिदा चलने समेऽपि मरुतो गतितः ॥

१४० तरुणीव रागितरुणाङ्कगता करिणी वनेषु करिणां सरति ।
हरिणी प्रयाति हरिणानुगता परिणीतलोकसरणिं दधती ॥

१४१ कुमुदैर्विभाति सरसीसलिलं वरराजहंसकलितं हि तथा ।
उडुमण्डलेन शशिसंवलितं गगनं यथा खमपि भाति तथा ॥

१४२ कलहंसपङ्क्तिकलमेखलया कमलोत्पलारचितमालिकया ।
सरसी विभाति सकलाभरणैरिव भूषिता प्रमुदिता वनिता ॥

१४३ वरसप्तपर्णकुसुमप्रभवं मदगन्धमावहति गन्धवहे ।
प्रतिदन्त्युपागमनमाकलयन्नभियाति वारणवरः प्रसभम् ॥ १९

१४४ ललनासु राजगृहमध्यगतास्वरविन्दवृन्दचरहंसकुले ।
करिणीषु निम्नगमनास्वलसा गतयोऽद्य भान्ति वननिर्गमने॥ २०

१४५ मृगवृन्दमत्र वनराजिगतं तृणभक्षणेन सलिलाशनतः ।
निजबालकैरपि सुखं शयनान् निजनिघ्नतां वदति पुण्यफलम् ॥

१४६ विशदप्रकाशधरकाशतटा नलिनीदलानुगतपद्मयुता ।
तरुणीव भाति तटिनीविशदावरणा कपोलधृतपत्रमुखी ॥

१४७ वृषभाः परस्परमुपोपगता निपतन्ति गोषु मदनप्रहिताः ।
प्रहरन्त्युदस्य निजपुच्छमहो वनशृङ्गवदनचटच्चटितैः ॥

१४८ विविधशालिमुखप्रसवोन्मुखीमुपगतामभितः परिपाण्डुताम् ।
भ्रमरलीनविनीलमुखोल्लसत्कमलकोशकुचामिव गर्भिणीम् ॥

१४९ परितः परितुष्टमानवां परिपश्यन् प्रजहर्ष भूपतिः ।
परिपालनमात्मनो भुवं प्रथयन्तीं स्फुटसस्यसम्पदा ॥

१५० इति शारदीं समवलोक्य वनेऽनुपमश्रियं निजपुराभिमुखः ।
नरनायको दशरथः समगादमराधिनाथ इव नन्दनतः ॥

१५१ अथ शारदेऽपि समये ककुभां विजयं तु तस्य मुहुराचरतः ।
उपषष्टिहायनसहस्रमभून् निजसन्ततिं प्रति विचिन्तयतः ॥

१५२ स्वनिकेतनं त्रिदशलोकसमं प्रतिपद्य जम्भरिपुतुल्ययशाः ।
महिषीः कदाचिदवलोक्य तदा नृपतिर्व्यचिन्तयदपत्यकृते ॥

१५३ शुकपञ्जरप्रकरभाजि रहस्युपविश्य सद्मनि सुतोपमया ।
शुकशावचुम्बनरता महिषीः स ददर्श तुङ्गतरपीनकुचाः ॥

१५४ अवलोकयन् सुविमलं भवनं भुवनप्रसिद्धतरवस्तुघनम् ।
नितरां विषण्णवदनो नृपतिर्मनुते स्म शून्यमिव तत् सदनम् ॥ ३०

१५५ अनपत्यताभिधसमीरसुहृत्परिदह्यमानमनसा प्रभुणा ।
अमरेन्द्रसंपदुपपन्नमहो भवनं हि शून्यमिव संददृशे ॥ ३१

१५६ कुलशीलसंपदुपपत्तिमता चतुरर्णवावधि च पालयता ।
अनपत्यताख्यतमसा विभुना जगदेव शून्यसदृशं ददृशे ॥

१५७ न भुनक्ति नो वसनमावृणुते न सुमानि चन्दनमपि स्पृशति ।
ललनासु नैव रमते नृपतिः स्मरसुन्दरोऽपि भवति स्म कृशः ॥

१५८ स विचिन्तयन्ननवधानमना अवरोधतो बहिरपाक्रमत ।
नवरत्नकीलितसभासदने मृगनायकासनमलंकृतवान् ॥

१५९ अथ धृष्टयशोकविजयप्रमुखाः ससुमन्त्रराजहितमन्त्रिवराः ।
समुपागमन्निह वसिष्ठमुनिप्रभृतिद्विजातिकुलचन्द्रमसः ॥

१६० उपवेश्य तानुचितचित्रपटारचितासनेषु परितः स नृपः ।
कमलोत्पलादिविलसत्सरसीगतराजहंस इव संददृशे ॥

१६१ गुरुमङ्गलोज्ज्वलकवीन्द्रबुधैःपरितोऽभिवेष्टितसभः स नृपः ।
उडुमण्डले नभसि चन्द्र इव प्रविकीर्णषोडशकलः शुशुभे ॥

१६२ पवनेरिताम्बुजलसन्नयनः स नृपः सभां समवलोक्य ततः ।
वचनं स सौष्ठवगभीरतरं समुपाददे ध्वनितदिग्वलयः ॥

१६३ विदितं भवद्भिरपि मेऽभिमतं निरपत्यताकुलितमानसतः ।
न शृणोति लेढि च न पश्यति नो मनुते ममेन्द्रियगणः कलयन् ॥

१६४ अनपत्यजन्म भवतीति वृथा ननु सर्वलोकविदितं जगति ।
असुतस्य नास्ति परलोक इति प्रथितं श्रुतिस्मृतिषु चाप्युदितम् ॥

१६५ तदिहाद्य यस्य यदपि स्फुरति प्रवदन्तु तन् मम हितं वचनम् ।
इति भाषिते नृपतिनाभिदधे स पुरोहितः प्रतिवचः सपदि ॥४१

१६६ नृपते स्मरस्युत न वा विपिने मृगयार्थमुद्यतधनुस्तुरगम् ।
अधिरुह्य दूरतरमेकपदे पथि यातवानसि नदीसविधम् ॥ ४२

१६७ मुनिकुम्भपूरणभवं निनदं करिबृंहितं कलयता भवता ।
विशिखो व्यसर्जि सरिति ध्वनिदिक्पतनस्वभाव इति मे गदितम् ॥

१६८ विशिखेन तेन स पपात मुनेस्तनयस्तु हा पितरिति प्रवदन् ।
विनिशम्य चैतदहमप्यगमं मुनिपुत्रसन्निधिमये विमनाः ॥

१६९ स तु मां निरीक्ष्य वदति स्म मुनिः कृतवान् किमेतदिति पापमते ।
वनधान्यजीवनभृतौ पितरौ परिपोषयामि नयनै रहितौ ॥

१७० अथ वैश्यजन्ममुनिपुत्रवचोवशतो विकृष्य विशिखं वपुषः ।
समुपानयं पितृसमीपममुं तदभूत् तयोरशनिपातसमम् ॥

१७१ अथ वैश्यवृद्धमुनिनाऽभिहितं वचनं कठोरतरमप्यमृतम् ।
शृणु भूप पुत्रविरहात् त्वमये निधनं प्रयास्यसि यथाहमिति ॥

१७२ तमिमं महापुरुषवागुदितं परमप्रसादमिव शापमपि ।
शिरसा वहन्नुपगतोऽहमिति स्मरसि त्वया नु कथितं हि पुरा ॥

१७३ तदिहानयस्व मुनिपुत्रमये नरनाथ नित्यवनवासरतम् ।
भुवि ऋष्यशृङ्ग इति च प्रथितं सुतहेतुकर्म स विधास्यति ते ॥

१७४ ऋष्यशृङ्गमुनिना सह योगे वक्ष्यते विधिमिहाद्य सुमन्त्रः ।
बालताप्रभृति तस्य चरित्रं सूचयिष्यति च विस्तरतस्ते ॥

१७५ इत्याभाष्य वचो वसिष्ठमुनिना मौने समालम्बिते
तत्रत्या जननाथमानससमाश्वासोत्सुका ये जनाः ।
ते सर्वे युगपत्समीरविचलत्कासारपद्मोत्पल –
प्रोद्यत्कान्तिसहोदरीं मुमुदिरे शोभां वहन्तः सदा ॥ ९१

ओर्गण्टिलक्ष्मणाध्वरिकृते सीतारामशोभनविहारे ।
श्रीगीतरामसोदरकाव्ये व्यगमत् तृतीयसर्गोऽयम् ॥३॥

इति श्रीसीतारामविहारे महाकाव्ये कविश्रीओर्गण्टि-
शंकरसोमयाजिसुतलक्ष्मणयज्वकृतौ
शरद्वर्णनं नाम तृतीयः सर्गः ।

—:0:—

चतुर्थः सर्गः

शान्तकन्याविवाहः

१७६ स वसिष्ठमुनीश्वरेरितं वचनं तद् विनिशम्य मन्त्रिराट् ।
अथ राजवरेण्यमूचिवाननुमोदं जनयन् सभासदाम् ॥ १

१७७ शृणु मे मुखतो महामते तव पुत्रागमभद्रसूचिकाम् ।
प्रणिधाय मनः कथामिमामुपगम्याद्य मुदं गमिष्यसि ॥

१७८ अधुनास्ति किलाङ्गमण्डले बहुकीर्तिर्भुवि रोमपादराट् ।
यदनीतिवशादभूदहो तदनावृष्टिकृतं महद्भयम् ॥

१७९ तदुपप्लवहेतुमग्रजानुपशान्तौ च विधिं स पृष्टवान् ।
कुत एतदुपस्थितं द्विजा अथ तच्छान्तिरपि प्रकथ्यताम् ॥

१८० तव दुर्विनयेन भूपते महतीयं पुनरीतिरागता ।
इति ते विनिवेद्य विप्लुतेरुपशान्त्यर्थमुपायमूचिरे ॥

१८१ स विभाण्डकसूनुरद्भुतस्वचरित्रेण निरस्तलौकिकः ।
पितृसेवननित्यतत्परो मतिमानृष्यविषाणनामकः ॥

१८२ तमिहानय भूपते बटुं त्वरितं देहि च शान्तकन्यकाम् ।
विषये भवतः स्थितैर्जनैः सकलोपद्रवशान्तिराप्स्यते ॥

१८३ इति तैः कथिते महीपतिर्निजमन्त्रिप्रवरान् पुरोहितान् ।
निदिदेश विभाण्डकात्मजानयने व्यग्रमनास्त्वरायुतः ॥ ८

१८४ अथ तेऽपि च रोमपादमाकलयन्तः कलुषीकृतान्तरम् ।
कठिनं च मुनिं गता इव व्यथिता व्याघ्रसरीसृपान्तरम् ॥ ९

१८५ इदमित्थमिहाचरेदिति प्रतिसन्धाय परस्परं च ते ।
गणिकाभिरिदं सुसाधमित्यवनीशस्य पुरो बभाषिरे ॥

१८६ स तथैव विधीयतामिति प्रतिसंदिश्य वचोऽभिसंदधे ।
अखिलो निगमान्तसञ्चयोऽद्वयसिद्धान्तसमाश्रयो न किम् ॥

१८७ तदनन्तरमादरान्विता गणिका भासुरभूषणांशुकैः ।
परिभूषितगात्रयष्टिकाः प्रहिताः संप्रययुर्वनान्तरम् ॥

१८८ अथ ता मृदुपादमन्थराः पथि गन्तुं प्रसभं गतक्षमाः ।
कलनिस्वनसुन्दरं वचः श्रममाविश्य मिथो बभाषिरे ॥

१८९ कलकण्ठि विकुण्ठितास्म्यहं द्रुतमायाहि दरालसेक्षणे ।
नलिनाक्षि न मेऽस्ति पादयोः बलमेतत् किमु मन्दगामिनि ॥

१९० ननु चम्पकवल्लिमानय प्रथमं तालफलस्तनि व्रज ।
गजगामिनि गच्छ सत्वरम् चपले चारुतरं व्रजाधुना ॥

१९१ ननु चन्द्रकले नयापि मामित आयाहि मदातिमन्थरे ।
अयि कल्पलतेव शक्नुयां किमु जातं कमलेक्षणे तव ॥

१९२ किमु धावसि कम्बुकण्ठि हे श्रय गारुत्मतवल्लि शीघ्रताम् ।
नलिनाक्षि करोषि किं पुरस्त्वमपीदं कुरु मीनलोचने ॥

१९३ कनकप्रतिमे कृपां कुरु त्वरयागच्छ तमालसप्रभे ।
कुटिलालकशोभने कथं करुणान्तःकरणे कथं न्वभूत् ॥

१९४ स्खलिता खलु कीरवाण्यहं कुरु बिम्बोष्ठि किमीदृशं वने ।
नयनान्ध्यमये रजोवशात् किमु नेत्रे रज आगतं तव ॥ १९

१९५ करवाण्यथ किं नु मल्लिके प्रथमं किं कलभाषणेऽकृथाः ।
इति भावविशेषगर्भितं गणिकाः श्रान्तिवशाद् बभाषिरे ॥

१९६ ऋतुषट्कसुमैरलंकृताः मिलिता एकवनेक्षणं सकृत् ।
घनमध्यगता बभासिरे वनितास्ता वनदेवता इव ॥

१९७ अधरोत्तरभागसंवृता उचितप्रावरणैरपाकृताः ।
महिलास्तु तमालकानने जलदालौ चपला इवाबभुः ॥

१९८ अतिनीलतमालवेषभृत्कषपाषाणतले परीक्षितुम् ।
शकला इव काञ्चनस्य ता मदनेनोपहता विरेजिरे ॥

१९९ अथ तत्र विभाण्डकाश्रमादविदूरे वनिताः समागताः ।
चलितुं पदमात्रमग्रतो न हि शेकुर्मुनिशापशङ्कया ॥

२०० किमतः परमत्र कुर्महे मुनिपुत्रस्य समागमं प्रति ।
इति संजगुरागमाय ता मृगशावस्य यथा हि लुब्धकाः ॥

२०१ अथ काचन नाट्यमातनोदपि मार्दङ्गिकतां परागमत् ।
श्रुतिगानपरा पराऽभवज् जगृहे तालमपीतरा तदा ॥

२०२ मुनिसूनुरपि प्रयातवानपचेतुं समिधः कुशानपि ।
परितः प्रचचार तद्वने निजतेजःपरिधूतदुर्मृगः ॥

२०३ स पुरः सहसा विलोकयन् वनितानां विततं कदम्बकम् ।
किमु वेदमिहेत्यचिन्तयन् मुनिजातं मृगयूथ एव च ॥

२०४ मुनयश्चुबुकेषु लोमशा मृगमात्रं तु चतुष्पदं खलु ।
स भविष्यति तद्विशेष इत्यभिसंधाय शनैरुपागमत् ॥

२०५ स ततः कलभाषणेन तद्गणिकानामपि गात्रशोभया ।
विननाम मुनीश्वरा अहो इति बुद्ध्या प्रवरं निजं वदन् ॥

२०६ गणिकाः स्वकरैरुपानयन्नुरु आलिङ्गनपूर्वकं निजम् ।
उरुपीनसमुन्नतैः कुचैर्नुनुदुस्तं तरसा विटं यथा ॥ ३१

२०७ स ततो न विकारमाप्तवान् नयनानन्दजलैः समन्वितः ।
इदमर्घ्यमिदं नु पाद्यमित्यवधानात् मधुपर्कमातनोत् ॥

२०८ कुसुमानि फलानि सादरं व्यतरत् तद्बहुमानमाचरन् ।
वचनानि च भाषते स्म ताश्चरितार्थो भवदागमादिति ॥

२०९ वनिता बटवे ददुस्तदा वटकापूपसमेतमोदकान् ।
वरलड्डुकभूरिपूरिकामधुरान्नरसान् मनोहरान् ॥

२१० बटुरप्यनुभूय तान्यहो वरभक्ष्याणि फलान्यमन्यत ।
भवदाश्रमभूमिसारतः सुरसानीति फलान्यभाषत ॥

२११ अतिपीतमृदा कृतो घटो बहुमाधुर्यजलं तदाश्रमे ।
इति हेमघटस्थपानकं मनुते स स्म निपीय साधुधीः ॥

२१२ वयमेकपदेन निश्चलाः सजपा ऊर्ध्वकरास्तपश्चराः ।
चलपादकटाक्षबाहवः त इमे सामजपास्तपोधनाः ॥

२१३ वनवद्भवनं पवित्र्यतां मम दत्त्वा जनकस्य दर्शनम् ।
तदनन्तरमादृता यथागमनं यात पुनः स्वमाश्रमम् ॥

२१४ इति तेन बलात्कृताश्च ता न समीयुर्मुनिशापभीरवः ।
स जगाम विलम्बितो भयात् पितुराज्ञावशगो मुनिस्तदा ॥

२१५ स तदेव मनोगतं पुनः पुनरुद्विग्नमना विचिन्तयन् ।
क्षणदां युगवन् निनाय तत्पुनरालोकनतत्परो मुनिः ॥

२१६ अथ भाग्यवशादुपागते दिवसे ध्यानपरो मुनिर्मुहुः ।
अगमत् पुनरत्र यत्र ताः प्रथमेऽनेन दिने निरीक्षिताः ॥ ४१

२१७ अवलोक्य तदा समागतं परिवव्रुः पुनरेव तं मुनिम् ।
ललनावलनेन ताः पृथक् स्वयमालिङ्गदसौ रसादिव ॥ ४२

२१८ भवतां द्वितयं स्पृशाम्यहं मसृणं शृङ्गमिदं तु बर्बरम् ।
इति तद्घनपीवरस्तनान् निजशृङ्गं स्पृशाति स्म चासकृत् ॥

२१९ इति लोकविचित्रभाषणं विदधानं प्रसमीक्ष्य ताः स्त्रियः ।
अवलोक्य परस्परं स्मितं कृतवत्यः पुनराचचक्षिरे ॥

२२० शृणु नो वचनं मुनीश्वर प्रभुरस्मद्भुवि वर्तते मुनिः ।
इति भावय शान्तकन्यकापरनामास्मदपेक्षया मृदुः ॥

२२१ तव तेन समागमाद् वरं ननु शृङ्गं परमुद्भविष्यति ।
इत एहि तदीयदर्शनं कुरुषे चेत् सुखमाप्स्यसि स्वयम् ॥

२२२ इति तद्वचनेन मोहितः सुतरां विस्मृततातसेवनः ।
अनुयातुमसौ मनो दधे वरनारीवशवर्तिमानसः ॥

२२३ अथ तन्मनसो विकारमाकलयन्त्यः परिहृष्टमानसाः ।
समुपाददिरे त्वरान्विता गणिकास्तं करबद्धवाहनाः ॥

२२४ मरुतो मनसोऽप्यवैदिकद्विजसंध्याकरणस्य वेगतः ।
अतिवेगवशात् स्वकप्रभोः विषयं निन्युरमुं वराङ्गनाः ॥

२२५ तदुपागमनोत्तरक्षणं विषये तस्य ववर्ष वासवः ।
मनुजानभितो विसृष्टवान् मुनिपुत्रागमशङ्कया नृपः ॥

२२६ अथ दूतमुखात् समागतं श्रुतवानृष्यविषाणनामकम् ।
मुनिपुत्रमुदारमानसः प्रययौ संमुखमस्य भूपतिः ॥

२२७ चतुरङ्गबलेन संयुतः तमुपादाय स भूरिवृष्टिभिः ।
गृहमेत्य वरासनोपरि स्थितमानर्च नृपो यथागमम् ॥ ५२

२२८ प्रददावथ शान्तकन्यकामपि वैश्वानरसाक्षिकं नृपः ।
रमते खलु शान्तया तया स तदारभ्य गृहेऽस्य भूपतेः ॥ ९३

२२९ स विभाण्डकसन्मुनीश्वरोऽपि प्रतिसंधाय समस्तकार्यजातम् ।
स्वसुतं सवधुं समीक्ष्य तुष्टः पुनरानन्दवने तपश्चचार ॥

२३० स मुनिः खलु याजयिष्यति प्रथितं पङ्क्तिरथं महीपतिम् ।
चतुरस्तनयांश्च लप्स्यते स च राजा मुनिसून्वनुग्रहात् ॥

२३१ तं भूपतिं दशरथः खलु रोमपादं
संप्रार्थयिष्यति गृहं समुपेत्य तस्य ।
जामातरं तमथ नेष्यति शान्तयाऽस्य
सत्कारपूर्वमथ सन्ततिमांश्च भावी ॥

२३२ इति साधु सनत्कुमारवक्त्रादुदितं तच् च पुराणवाचनेन ।
मुनिभिः कथनाच्च छ्रुतं मया तत् प्रयतस्वाद्य मुनीश्वरागमाय ॥९७

ओर्गण्टिलक्ष्मणाध्वरिकृतसीतारामशोभनविहारे ।
श्रीचमत्कारलहरीसोदरकाव्ये चतुर्थः सर्गोऽभूत् ॥ (४)

इति श्रीओर्गण्टिशंकरसोमयाजिसूरिसूनुलक्ष्मणयज्वकृतौ

सीतारामविहारे महाकाव्ये

शान्तकन्याविवाहो नाम चतुर्थः सर्गः ।

——:०:——

पञ्चमः सर्गः

वाराणसीवर्णनम्

२३३ अथ पङ्क्तिरथो निशम्य वाक्यं
परमाप्तेन सुमन्त्रमन्त्रिणोक्तम् ।
गमनाय मतिं चकार तत्र
द्विजराजोचितरोमपादगेहे ॥ १

२३४ चतुरङ्गबलेन संवृतोऽगात् सकलान्तःपुरकामिनीयुतोऽसौ ।
मुनिभिश्च वसिष्ठवामदेवप्रमुखैर्मन्त्रिगणेन चाङ्गदेशम् ॥

२३५ अथ पङ्क्तिरथं स्वदूतवाचा नगरप्रान्तमुपागतं विदित्वा ।
निजबन्धुजनैः सभृत्यवर्गैरुपयातोऽभिमुखं स रोमपादः ॥

२३६ बहुमानपुरःसरं तदानीं तमुपानीय नरेश्वरं स्वगेहे ।
उपचारशतैः स तोषयित्वा दिवसान् कांश्चन वासयांचकार ॥

२३७ स कदाचिदुवाच रोमपादं बहुसंतोषयुतं निजागमेन ।
तव सख्यवशाद् वदामि राजन्निह जानीहि समागमे निमित्तम् ॥

२३८ मम सन्ततिहेतुभूतयज्ञं तव जामातृवशं वदन्ति सन्तः ।
अत एनमनुव्रजेति वक्तुं समयस्ते नृप शान्तया समेतम् ॥

२३९ स तथेति विमृश्य कार्यभागं तनयामृष्यविषाणमुत्सवेन ।
निजवैभवयोग्यभोग्यभाग्यैरनुमेने गमनाय तेन सार्धम् ॥ ७

२४० स च राजशिरोमणिस्तदा तौ स्वपुरस्ताद् वरदम्पती विधाय ।
प्रविवेश पुरीं मृदङ्गनाद्यध्वजरम्भाकलशैरुपेतरथ्याम् ॥ ८

२४१ स मुनिं सवधुं प्रवेश्य हृष्टो जननाथो रचयन् महोपचारैः ।
परितोषणयुक्तमादरेण स्वगृहे वासयति स्म सेवमानः ॥

२४२ अथ दैववशाद् वसन्तकाले सुविशुद्धे समुपागते नरेन्द्रः ।
विधिदृष्टविधानतोऽश्वमेधं कृतवान् सन्ततिसम्पदां समृद्ध्यै ॥

२४३ तदनन्तरमृष्यशृङ्गविद्वान् सुतहेतोः समयाजयन् नरेन्द्रम् ।
जमदग्निवसिष्ठवामदेवप्रमुखैर्विप्रगणैः सहर्त्विगीशैः ॥

२४४ सरयूत्तरतीरयज्ञभूमौ सुतकामेष्टिविधौ प्रवर्तमाने ।
अमराः समचिन्तयन् समेता व्यथिता रावणकुम्भकर्णतस्ते ॥

२४५ इतरेतरमभ्यधायि देवैरितिकर्तव्यतया विनिश्चितार्थैः ।
तदनु त्वरया गतिर्वितेने वरकैलासगिरिं प्रतीश्वरस्य ॥

२४६ त्रिदशागमनस्य यद् रहस्यं तदवेत्याशु जगाद तत्र भृङ्गिः ।
इह किं समागता भवन्तो ननु काशीं त्वरितं व्रजन्तु देवाः ॥

२४७ अधिकाशि वसत्यसौ महेशो बहुकालप्रभृति प्रमोदयुक्तः ।
रसिकस्तरुणश्चिरप्रवासी पुनरागत्य वसेद् यथा वधूव्याम् ॥

२४८ परिपश्यत सर्वपर्वतोऽसौ परितोऽप्युज्जट एव दृश्यते हि ।
प्रमथा अपि सिद्धयक्षविद्याधरगन्धर्वगणाश्च तत्र याताः ॥

२४९ इति तद्वचनैर्निरस्तकामाः प्रतियाता अधिकाशि यत्र शम्भुः ।
प्रथमं मणिकर्णिकाजलौघे विनिमज्याखिलकल्मषैर्विमुक्ताः ॥

२५० अथ तां मणिकर्णिकां धुरीणा विविधस्तोत्रविधौ पृथक् पृथक् ते ।
परितुष्टुवुरादरेण सर्वे निगमान्तैरपि नामिधेयरूपाम् ॥ १८

मणिकर्णिकाष्टकम्––

२९१　करुणां कुरु मय्यनन्यनाथे तरणे पातकजालकर्दमस्य ।
अरुणांशुकवेष्टिताङ्गयष्टे शरणं त्वां मणिकर्णिके प्रपद्ये ॥ १९.

२९२　तरणे प्रतिभूर्भवस्यगाधे तरणार्थाभिनिविष्टमानसानाम् ।
तरणिर्भव मेऽघदुःखसिन्धौ शरणं त्वां मणिकर्णिके प्रपद्ये ॥

२९३　मरणार्थसमेतजन्तुकोट्यैः तरणीन्द्वग्निसमानधामदात्रि ।
करुणामृतपूर्णहृत्प्रदेशे शरणं त्वां मणिकर्णिके प्रपद्ये ॥

२९४　तरुणारुणदीप्तिभासमाने वरुणासीवरमध्यभागभूषे ।
वरणीयमहागुणाभिरामे शरणं त्वां मणिकर्णिके प्रपद्ये ॥

२९५　भरणं कुरु मे समस्तलोकाभरणं त्वां प्रणमामि मोक्षदात्रि ।
परिणाहविभासितान्तराले शरणं त्वां मणिकर्णिके प्रपद्ये ॥

२९६　वरुणादिसुराभिवन्द्यभास्वत्करुणासागर विश्वनायकस्य ।
चरणाभिमुखं स्थितासि नित्यं शरणं त्वां मणिकर्णिके प्रपद्ये ॥

२९७　सरणिस्तव देवि सर्वतीर्थैः सरणीया यदि तीर्थता तदा स्यात् ।
धरणीतलवासमात्रतः किं शरणं त्वां मणिकर्णिके प्रपद्ये ॥

२९८　हरणीयमघं ममेति नित्यं धरणीयं तव पादपङ्कजं मे ।
करणीयमतःपरं मया किं शरणं त्वां मणिकर्णिके प्रपद्ये ॥

२९९　इति तां स्तुतिभिः प्रतोष्य जह्नोः
　　तनयां तुष्टुविरे दिवौकसस्ते ।
उचितं तु तदेव जाह्नवीयम्
　　जननी यद् भुवनत्रयस्थितानाम् ॥ २७

इति लक्ष्मणसोमयाजिनाम्ना कृतमेतन्मणिकर्णिकास्तवं ये ।
प्रपठन्ति दिने दिने प्रभाते ननु ते स्नानफलं सदा लभन्ते ॥ २८

गङ्गास्तोत्रम् –

२६० विचलकलविहङ्गे विष्णुपादाम्बुसङ्गे
तटतरुरतभृङ्गे तीरचञ्चत्कुरङ्गे ।
विमलतरतरङ्गे विश्वनाथाञ्चिताङ्गे
सकलकलुषभङ्गे पाहि मां देवि गङ्गे ॥

२६१ जनैर्दूरे धीरे जननि तव तीरे स्थिरतरं
नरं धन्ये मन्ये हिमशिखरिकन्ये सुनिपुणम् ।
असौ वारंवारं जननमृतिभारं परिजहत्
स्वसंसारं सारं भवजलधिपारं हि भजति ॥

२६२ त्वदुत्सङ्गे गङ्गे विहरणविहङ्गे मयि मिलत्-
कृपापाङ्गे सङ्गे तव वरतरङ्गेण सति मे ।
कुतः पापं तापं जनयतु समीपं परिजहत्
परं द्वीपं दीपं तम इव दुरापं व्रजति हि ॥

२६३ गङ्गे भृङ्गाङ्गनालीविरचितकलसंगीत भङ्गीविलग्न–
स्वान्तानन्दानुरूपप्रविततपुलकभ्रान्तिदालपालपभङ्गे ।
अङ्गीकुर्वद्य मां त्वत्सकरुणरुचिरापाङ्गलावण्यगङ्गा –
तुङ्गोर्मिस्नापिताङ्गस्वकपरिजनसङ्घातमध्येऽन्तरङ्गम् ॥

२६४ अम्ब त्वामनुसंदधेऽहमनिशं चित्तेन वाचापि ते
स्वर्भूलोकरसातलेषु विततां कीर्तिं स्तुवे पावनि ।
गङ्गे तुङ्गतरङ्गसङ्गिहिमवत्पादे पदाब्जं च ते
साष्टाङ्गं प्रणमामि तारय परं मां देवि दुःखार्णवात् ॥ ३२

२६५ गङ्गे मङ्गलदायिभव्यचरिते रङ्गत्तरङ्गोज्ज्वले
साङ्गो मेऽस्तु मनोरथस्त्वयि सदा स्नानेन पानेन च ।
एतावत्तु वृतं मया तव पुनस्तीरे सदा सात्त्विकैः
वेदान्तार्थविचारतत्परतरो नेष्ये चिरं वासरान् ॥ ३४

२६६ गङ्गे तावकतीर एव सततं वस्तुं मनो मेऽस्ति चेद्
अस्त्वेवं ननु दिव्यमङ्गलगुणे किं तावता साधितम् ।
मातुः स्तन्यमपेक्ष्य भूरिकरुणालापैः परं बालको
रोदिष्यत्यसकृद् ददाति यदि सा सार्थस्तदा तच्छ्रमः ॥

२६७ अम्बात्वाभिमुखीकृतासि सुचिरं जन्मान्तरेष्वर्जितैः
पुण्यैरन्यसुदुर्लभैस्तव मया प्राप्तं कटाक्षेक्षणम् ।
यत् प्राप्यैव शिवः शिवोऽभवदसौ विष्णुश्च विष्णुत्ववान्
ब्रह्मा ब्रह्मपदं जगाम महिमा गङ्गे तवात्यद्भुतः ॥

२६८ इति जह्नुसुतां जगद्विभूषामभिनन्द्याथ समस्तदेवतास्ताः ।
जनुषः फलमद्य जातमित्यालपनं चक्रुरतीव हृष्टभावाः ॥

२६९ तदनन्तरमेत्य तत्प्रतीरं तुलसीं संददृशुस्त्रिलोकवन्द्याम् ।
स्तुतिभिः सह तत्प्रदक्षिणानामुचितं प्रभुक्रमणं वितेनिरे ते ॥

*Verse found in one of the manuscripts.

पठन् गङ्गाष्टकमिदं लक्ष्मणाध्वरिनिर्मितम् ।
आयुरारोग्यपुत्रार्थं विद्यासिद्धिमवाप्नुयात् ॥

तुलसीस्तोत्रम् –

२७० तुलसि स्वजनानुरञ्जनि त्वं मम मातर् जनयामितप्रमोदम् ।
अपरं त्वधिकं न चार्थये त्वां करुणापूर्णकटाक्षमन्तरेण ॥

२७१ तव मूलतलप्रविष्टनीरं शिरसि क्षिप्रमहो विशुद्धहीरम् ।
परिभाति किरीटमाशु तत्र प्रवदिष्यामि कथं तव प्रभावम् ॥

२७२ शृणु गारुडरत्नचारुवर्णे तव पर्णं निदधाति यः स्वकर्णे ।
स भवत्यचिरेण दानकर्णो धनधान्यादिसमृद्धिभिश्च पूर्णः ॥ ४१

२७३ तुलसीं तलशीतनीरपूरामुपरिप्रान्तजटाकलापभाराम् ।
प्रणमामि तपोविधानदक्षां निजभक्तार्तिविपाटनैकदीक्षाम् ॥ ४२

२७४ हरणं कुरु देवि किल्बिषाणां तरणाय प्रभवेयमीदृशोऽहम् ।
शरणं तव पादपङ्कजातं भरणं मे कुरु यावदायुरास्ते ॥

२७५ निजबोधमनुप्रणीतमेतन् ननु देवि स्तवनं मुदे तवास्तु ।
जननी विनिशम्य पुत्रवाचः परमाव्यक्ततराश्च मोदते हि ॥

२७६ इति तां तुलसीं वचोविलासैर्विविधैररप्यभिवाद्य हृष्टचित्ताः ।
ददृशुः परितो विलोक्यमानाः तटिनीतीरगतां पुरस्य शोभाम् ॥

२७७ अथ कश्चन कंचिदाबभाषे बहुजन्मान्तरपुण्यपूतदेहाः ।
विलसन्ति विलोकयात्र काश्यामधिगङ्गं मनुजाः सदानुवङ्गम् ॥

२७८ मुकुटापटयुक्कटिप्रदेशा वरपीताम्बरधारिणश्च केचित् ।
निटिलाङ्गणभासितोर्ध्वपुण्ड्राः क्वचनात्यद्भुतलापितत्रिपुण्ड्राः ॥

२७९ तुलसीवनमालिकोज्ज्वलाङ्गा वररुद्राक्षविभूषितोत्तमाङ्गाः ।
स्तिमितं निजमन्त्रजापशीलाः कतिचिच्छास्त्रविलग्नवादलोलाः ॥

२८० शमितोल्मुकदत्तरेखफालाः सकलाङ्गाञ्चितशङ्खचक्रजालाः ।
निजवक्षसि लम्बिताक्षमाला अतितीव्रं करजालिताक्षमालाः ॥

२८१ जटिला अपि चोर्ध्वबाहवोऽधः कतिचिद् वृक्षविलम्बितोर्ध्वकायाः ।
करमण्डितदण्डकुण्डिकास्ते यतयो ब्रह्मविचारणैकशीलाः ॥

२८२ प्रमदाः कनकप्रभाः समन्तात् प्रविगाह्याम्भसि बद्धपीतचेलाः ।
जरठाश्च कुमारिकास्तरुण्यः प्रतियान्ति स्वगृहाणि मन्दमन्दम् ॥

२८३ पशुपक्षिमृगादिमुक्तिदात्री प्रथिता भारतखण्डसारगात्री ।
भुवनेषु चतुर्दशस्वमेया वरकाशी विदिता हि पुण्यराशिः ॥ ५२

२८४　प्रददाति पदे पदेऽपि काशी
　　वनिताभ्योऽपि विशुद्धमुक्तिकन्याम् ।
न हि दृष्टचरः क्वचित् त्रिलोक्याम्
　　अयमाश्चर्यकरो विवाहयोगः ॥　५२

२८५　अधिकाशि परं विचित्रमेतत् परिणीता किल यत्र मुक्तिकान्ता ।
पशुपक्षिमृगादिभर्तृकोट्यै परमानन्दमियं ददाति तुल्यम् ॥

२८६　निगमान्तवनान्तचारदक्षैः विकिरद्भिर्मतिवागुराः समन्तात् ।
अपि दुर्ग्रहणा मुनीन्द्रलुब्धैः सुलभा मुक्तिमृगीह सर्वजन्तोः ॥

२८७　इति देववरेण वेद्यमाने सति काश्या अतिचित्रसच्चरित्रे ।
दिविजा बहु मेनिरे दुरात्माप्यहहात्रानयति स्म रावणो नः ॥

२८८　तदनन्तरमत्र ढुण्ढिराजप्रमुखानां विनिवर्त्य नित्ययात्राम् ।
उपविश्य च मुक्तिमण्डपे स्वान् सकलेष्वात्मसु मेनिरे कृतार्थान् ॥

२८९　विबुधास्त्वरयाथ भैरवस्य स्थलमाजग्मुरनल्पशासनस्य ।
अमरेशकृताभ्यनुज्ञया तं परितुष्टाव बृहस्पतिर्विचित्रम् ॥

कालभैरवाष्टकम् –

२९०　सदैव देव देव ते पदारविन्दसेवनं
　　मदीयशेवधे विधेयमादराद् दरादपि ।
यतस्तु वस्तुतस्त्वहं नयानयौ भयाभये
　　न वेद्मि कालभैरव प्रभो कथं क्षमिष्यसि ॥

२९१　फणीन्द्रकङ्कणे करे करोटिधारणोज्ज्वलो
　　ज्वलद्द्वितीयहस्तदण्डकर्णभासिकुण्डलः ।
महान्धकारनीलकोमलप्रभो जयत्यसौ
　　सुवर्णनिर्मितोपवीतभूषणः पटुर्बटुः ॥　५९

२९२　परेतभूतजातभीतभीतलोकवीक्षितं
कगलहस्ततालतालरूपकोटिभिर्वृतम् ।
पटुं बटुं नटं तमादिदेवमावृतं सुरैर्
मुदा यदा कदापि कालभैरवं समाश्रये ॥ ६०

२९३　कदापि देव तावकं पदं न चिन्तितं मया
करेण वा न पूजितं वचोभिरीडितं न हि ।
कथं नु कालभैरव प्रभो सहिष्यसे नु मां
कथं नु पालयिष्यसे शतापराधसंकुलम् ॥

२९४　सदा कलत्रपुत्रमित्रलाभलोभधाविनं
त्वदीयचिन्तनं विना निरर्थकालयापिनम् ।
त्वमेव मामिह प्रभो दयालुरेधि पालय–
न्नहिं च नैव मारयन्ति चेद् दयालवो जनाः ॥

२९५　चराचरे सुरासुरैर्धराधरैर्धरामरैः
पुरा करैः पुरः पुरः परम्पराभिरर्चितम् ।
मनोरथैर्मनोगतं मनोभिरञ्चितं नरैः
परैर्वचोभिरादृतं सदैव भैरवं भजे ॥

२९६　निवेदयामि मानसं त्वदीयपादपङ्कजे
कराम्बुजेन पूजये भवन्तमेव भैरव ।
नमामि मस्तकेन तात वीक्षणं सदास्तु ते
शृणोमि तावकीं कथामतः परं भयं कुतः ॥

२९७　मनोवचःस्वकर्मभिर्मदीयदैवतं सदा
भजामि कालभैरवं परं तु संसृतेर्भयम् ।
अतः परं कुतः परं यतः परं न वेद्मि तत्
पदारविन्दमन्तरा मदन्तरे निरन्तरम् ॥ ६१

२९८ इदं शिखण्डिनन्दनेन निर्मितं मुदेऽस्तु ते
मदीयभैरवाष्टकं पठन्ति चेत् सदा बुधाः ।
तरन्ति भैरवाद् भयं चरन्तु कामचारतः
परन्तु मोक्षमाप्नुवन्ति नात्र संशयः सखे ॥ ६६

२९९ इति स्तुतस्तु भैरवो मनोरथं विचिन्त्य तं
दिवौकसां निजाश्रयं महेश्वरस्य दर्शनम् ।
अवश्यकारणीयमित्यलं विचार्य मानसे
निनाय तान् पुरो निधाय विश्वनाथसन्निधिम् ॥

३०० श्रीविश्वेश्वरसंनिधिं सुरवरान् प्रापय्य तेषां मनो
वाञ्छां चापि निवेद्य दुःसहमहादैत्यैः कृताद् बाधनात् ।
स्वीयैः पुत्रकलत्रमित्रविभवैः स्वस्वाधिकारैरपि
व्यत्यस्तान् प्रतिपाद्य तान् स्वभवनं यातस्ततो भैरवः ॥ ६८

ओर्गण्टिलक्ष्मणाध्वरिकृते सीतारामशोभनविहारे ।
गीतमहेश्वरवोदरकाव्येऽभवदत्र पञ्चमः सर्गः ॥५॥

इति श्रीमत्सीतारामविहारे महाकाव्ये

कविश्रीशंकरसोमयाजिसूनुलक्ष्मणयज्वकृतौ

वारणसीवर्णनं नाम पञ्चमः सर्गः

——:०:——

षष्ठः सर्गः

बिन्दुमाधवसाक्षात्कारः

३०१ ततस्तु विश्वनायकस्य संनिधिं प्रविश्य ते
स्वकीयदुःखमादितो निशाचरेण निर्मितम् ।
निवेदनीयमित्यदःस्तुतौ शिखण्डिनन्दनं
नियोजयांबभूवुरुक्तिचातुरीधुरंधरम् ॥ १ ॥

३०२ बृहस्पतिस्तु दैवतैर्नियोजितो महामतिर्
महेश्वरस्य संस्तुतिं मुदान्वितः प्रचक्रमे ।
अवाङ्मनोविवेचनस्य तस्य कः स्तुतौ प्रभुर्
बृहस्पतिं विना वचोऽधिनायकं चराचरे ॥

३०३ ॐ नमस्ते भगवते दक्षिणामूर्तये नमः ।
मह्यं मेधां प्रयच्छाशु प्रज्ञां च वितर प्रभो ॥

३०४ स्वाहा स्वधा वषट्कारस्त्वमेव सकलं जगत् ।
अनादिनिधनं देवं नुमः सृष्ट्यादिकारणम् ॥

३०५ प्रभो शंभो त्वं भो दुरितगिरिदम्भोलिसदृशे
निजे नाम्न्युद्दाम्नि प्रबलतरधाम्नि प्रतिपदम् ।
मतिं दद्या विद्याप्रद पुनरविद्यां हर हरेर्
ममामित्यै भूत्यै दुरितमपनुद्येवमव भोः ॥ ५

३०६　स्वसंसारं घोरं प्रतिपदमसारं कलयता
मया वारं वारं बत निजशरीरं विमथितम्।
न वा दृष्टं दृष्टं किमपि दुरदृष्टं फलमये
पुराराते हा ते चरणजलजाते न हि नुते ॥ ६

३०७　पुरः सारं सारं मम निखिलसारं हृतवतः
दुराचारानारान् नयनमुखचोराननुभवन्।
ममाधाराद् धीराद् धृतनिखिलभारादिह विभो
त्वदन्यस्मिन् कस्मिन् क्व नु ननु परस्मिन् सति स्याम् ॥

३०८　सुराधीशे नीशे त्वयि गदितुमीशे न बहुलं
तथाप्येवं भावं कलय मम दैवं शशिधरम्।
विना नान्यो मान्यस्त्रिभुवनवदान्योऽपि च भयं
जगद्गण्ये गुण्ये त्वयि शिवशरण्ये सति कुतः ॥

३०९　इमं सर्वं गर्वं कलय मम सर्वोत्तम विभो
सदा पूर्वं शर्वं सुरविनुतचार्वङ्घ्रिकमलम्।
सकृन् नत्वापि त्वामहमगणयित्वान्तकमपि
स्थिरो भूत्वा धृत्वा तव पदमभीत्वा च विहरे ॥

३१०　नमो भूयो भूयो हर विपदि मा योजय जये –
त्ययं नित्यं स्तुत्यं शिव वदति सत्यं सविनयः।
परं त्वेनं दीनं दुरितभयदूनं तव कृपा–
सुधासारैः सारैः स्नपय भवपारैककरणैः ॥

३११　निगृह्णानो नानोचितकृतविधानोऽसुरगणान्
सुरान् भीतान् वीतासुरजभयजातान् रचयसि।
दयाम्भोधे नाथे त्वयि सति न नाथेयमपरं
न मे दम्भोऽयं भो भव भव भवाम्भोधितरणिः ॥ ११

३१२ मृडं मार्गं मार्गं श्रुतिगदितमार्गं प्रतिविशन्
भवं धावं धावं स्वजनमनुधावन्तमभितः ।
हरं स्मारं स्मारं दुरितजनदूरं प्रतिदिनं
शिवं गामं गामं गतनिखिलकामं च विहरे ॥ १२

३१३ न यो भूयो भूयो हर हर हरायों नम इति
स्थिरो भूत्वा भूत्वा भव भज भजेति प्रभजति ।
अटन् स्वर्गं दुर्गं भुवमधरमार्गं च स विशन्
जनो नानोपायैः क्व नु तर तरेति प्रतरति ॥

३१४ इदं तोत्त्रं जोत्रं करणहयमात्रं नियमितुं
कलेश्चित्रं दात्रं शशिधरकृपापात्रमयि भोः ।
महालक्ष्मीलक्ष्म व्यरचयत वाचस्पतिरसौ
सुसंवित्का उत्काः कलयत चमत्कारलहरीम् ॥

३१५ गण्डमण्डलप्रसारिकुण्डलीकृताद्भुत-
प्रौढकुण्डलीश्वरप्रकृष्टकुण्डलोज्ज्वलम् ।
खण्डितारितुण्डखण्डमण्डिताजिमण्डलं
विश्वनाथमम्बिकासनाथमीशमाश्रये ॥

३१६ गाङ्गतुङ्गभङ्गसङ्गतोत्तमाङ्गशोभितं
शृङ्गिशृङ्गरङ्गसाङ्गनावभङ्गिरञ्जितम् ।
अङ्गनाविनिर्मितत्रिभङ्गिमङ्गलस्तुतिं
विश्वनाथमम्बिकासनाथमीशमाश्रये ॥

३१७ कुन्दवृन्ददन्तसुन्दराननारविन्दस-
न्मन्दमन्दहासनन्दितामरेन्द्रवन्दितम् ।
नन्दनन्दनादिवन्दिनन्दितेशिताश्रयं
विश्वनाथमम्बिकासनाथमीशमाश्रये ॥ १७

३१८ आत्मनामधामवीमदामयापहारिणं
कामभीमसोमसोमसीममामकाश्रयम् ।
वामवामवामवामदेवदेवकामदं
विश्वनाथमम्बिकासनाथमीशमाश्रये ॥ १८

३१९ देव देव देव भाव भाव भावनावनं
भाविभासिभाविभीविभञ्जनं निरञ्जनम् ।
एवमेव सेवके विवेकदायिनं विभुं
विश्वनाथमम्बिकासनाथमीशमाश्रये ॥

३२० गर्गमुख्यमौनिवर्गदुर्गमापवर्गदं
स्वर्गवैरिदुर्गमार्गदुर्गहारिणं शिवम् ।
दुर्गया परिष्कृतं निसर्गसुन्दरं हरं
विश्वनाथमम्बिकासनाथमीशमाश्रये ॥

३२१ दक्षयज्ञशिक्षणाय दीक्षितं विचक्षणं
जक्षणाय चक्षुषा विपक्षमीनलक्ष्मणः ।
लक्षशोऽमरेन्द्रवैरिशिक्षणाय दक्षिणं
विश्वनाथमम्बिकासनाथमीशमाश्रये ॥

३२२ एहि देहि देहि शर्म पाहि पाहि मे हितं
साहिपाणिपङ्कजस्य को हि ते स्तुतौ प्रभुः ।
मोहितोऽहमीहितप्रदस्त्वमूहितो बुधैः
विश्वनाथ पार्वतीसनाथ पाहि नः सदा ॥

३२३ इति विश्वपतिं प्रणम्य नानाविधमन्त्रैः स्तुतिभिश्च तोषयित्वा ।
स तु चित्रशिखण्डिसूनुरूचे न च किंचित् त्रिदशान् प्रतीक्षमाणः ॥

३२४ अथ विश्वपतिं प्रणम्य देवाः स्तुतिभिर्विश्वजनीनचित्रवृत्तम् ।
निजदुःखमभाग्यरावणेन क्रियमाणं कथयाम्बभूवुरुच्चैः ॥ २४

३२५ रणचण्डकर: प्रचण्डतेजा रुधिराशी भुवि देव रावणोऽसौ ।
चतुराननदत्तधामभास्वद्वरलाभेन विबाधते जगन्ति ॥ २५

३२६ किमु वाच्यमितोऽन्यदादरात् त्वं शृणु देवेश विपत्तिमस्मदीयाम् ।
विधिकण्ठगतं महोपवीतं त्रुटितं द्वारि कशाप्रहारपातैः ॥

३२७ अपि वह्निमुखे जलं क्षिपन्ति प्रतिबध्नन्ति गुणेन पाशहस्तम् ।
नयनं धनदस्य च द्वितीयं प्रणुदन्त्यग्रकराङ्गुलिप्रतोदैः ॥

३२८ अमरेशसहस्रनेत्रमालामनुलिम्पन्ति विनोदमाचरन्तः ।
यदगारवितर्दियष्टिहस्ताः किमु किं नादधते कुचेष्टितं नः ॥

३२९ रविरातनुतेऽतिसूक्ष्मतापं शशिना पूर्णकलेन भूयतेऽत्र ।
पृषदश्वगतिः सदातिमन्दः स सरस्वान् न हि घोषमातनोति ॥

३३० जगदीश कृता त्वया व्यवस्था विपरीता क्रियते च तेन सर्वा ।
द्विजदत्तहवींषि यानि तानि स्वयमेवात्ति न चेद् विहन्ति सर्वान् ॥

३३१ बहुसुन्दररूपसम्पदो या निजधाटीषु धृता वरस्त्रियस्ताः ।
बहुना किमु पापिना सुरेश प्रमदा हर्तुमपेक्ष्यते च तेन ॥

३३२ शरणं भव विश्वनाथ शीघ्रं तरणोपायममीषु चिन्तयस्व ।
करुणापरिपूर्णसागरं त्वां परिणामे गतिरन्यथा विना न ॥

३३३ अत एव समे सुराधिनाथप्रमुखा देवगणा इहाभियाताः ।
अधुना जगदीश ते कृपा चेद् भवितैषां दिवि शाश्वतोऽधिकारः॥

३३४ इति रावणबाधने समन्तादुदिते देवगणैर्महेश्वरस्य ।
वदनं वचसा विभूषितं तद् भवनं चापि तथा प्रतिस्वनेन ॥

३३५ न नु वो विदितं नु मत्प्रवृत्तिर्न मदर्थो हि समस्तविष्टपेषु ।
सकलोऽपि समो यथा हि वृष्टेर्मम शिष्टेषु तथापि पक्षपातः ॥ ३५

३३६　स मया बहुवारमाहृतोऽभूदप्रवृत्तोऽपि　तपःप्रतोषितेन ।
परिपोष्य न मार्यते हि कश्चित् सुदुरात्मेति पृथग्जनेन वापि ॥३६

३३७　भवनं ननु बिन्दुमाधवस्य व्रजतेहैव मदर्थमागतस्य ।
स विधास्यति सर्वकार्यजातं भवतां भारवहः क्षणे क्षणेऽपि ॥

३३८　इति विश्वपतेरनुज्ञया न प्रतिवाचं ददिरे दिवौकसस्ते ।
प्रभविष्णुषु शोभते हि लोके बहुधाज्ञाकरणं न वाक्प्रलापः ॥

३३९　तत एनमभिप्रणम्य सर्वे प्रतियाता अनुबिन्दुमाधवं ते ।
विनिवेद्य च वेत्रपाणिवर्यैरुपनीता नवरत्नमण्डपान्तः ॥

३४०　अथ हीरवरासनोपविष्टो हिमवत्पर्वतशृङ्गसंनिविष्टः
धृतपीतपटः कटिप्रदेशेऽधरभागे परिरञ्जितोऽधिसायम् ॥

३४१　कमलाकलितश्च वामभागे वरविद्युल्ललनाविभासिताङ्गः ।
अधिकन्धरपुण्डरीकमालः सबलाकावल्यातिशोभिकण्ठः ॥

३४२　निजभाषणनादपूरिताशः स्तनितापूर्णचतुर्दिगन्तरालः ।
त्रिदिवेषु चतुर्भुजः प्रसन्नः कृषिजीविष्विव नीलनीलमेघः ॥

३४३　इत्थं समस्तविबुधाननपद्मशोभा–
सम्पादनाय सवितारमिव प्रसन्नम् ।
आरेभिरे स्तुतिशतैरमराधिनाथं
नारायणं समभिवर्धयितुं शरण्यम् ॥

३४४　नित्योऽपि नित्यनिगमान्तगणैरवेद्यः
सर्वेश्वरोऽपि सकलामरभारवाहः ।
ज्ञानप्रदोऽपि सनकादिभिरप्रमेयः
स्वामिन्नचिन्त्यमहिमा तव केन वर्ण्यः ॥ ४४

३४५ देव त्वदीयचरितं विधिरप्रमेयं
किं वर्णयिष्यति तनोस्तव जातजन्मा ।
वाचामगोचरमहो मनसां च विद्वा–
नानन्दमेत्य न बिभेति कुतश्चन त्वाम् ॥ ४९

३४६ नारायणाखिलजनावनलोकनाथ
त्वं नः कटाक्षविषयान् किमु नो करोषि ।
संसारसागरनिमग्नदुरुद्धराणा–
मस्माकमद्य तरणिर्भव दीनबन्धो ॥

३४७ पीताम्बराच्युत मुकुन्द मुरान्तकेति
विश्वंभरेति वदतां ननु माधवेति ।
ऐश्वर्यमच्युतिविमोक्षविनिर्भयानि
संरक्षणं सुखमपि क्रमशो ददासि ॥

३४८ अस्माकमीश शरणं तव पादपद्मं
सर्वेप्सितप्रदमये समुपागतानाम् ।
नो चेत् करोषि परिपालनमद्य नष्टा
हा हन्त धेनुरहिता इव बालवत्साः ॥

३४९ इत्थं समस्तदिविजैरपि दूयमान–
चित्तैरुदीरितवचो विनिशम्य देवः ।
आश्वासयत् सुरगणान् वचनं वितन्वन्
गर्जन् कृषीवलजनानिव नीलमेघः ॥

३५० तापः किमर्थमधुना क्रियते भवद्भिः
विश्वेश्वरेण विदितं प्रहिता इहेति ।
विद्रावणः स जगतां ननु रावणोऽपि
दुःखं ददाति भवतामिति चापि वेद्मि ॥ ५०

३९१ निश्चिन्तमद्य दिविजाः प्रतियात सर्वे
स्वात्मानमेनमुपनीय पृथक् चतुर्धा ।
संप्राप्नुयां दशरथस्य कलत्रगर्भान्
यज्ञं करोति स नृपोऽपि तदर्थमेव ॥ ९१

३९२ तत्रारविन्दकुलबन्धुविशुद्धवंश –
भास्वज्जनेर्दशरथस्य गृहेऽवतीर्णः ।
तं रावणं सकुलपुत्रकलत्रमित्र –
बन्धुं निहन्मि सुखमाप्नुत दैवतानि ॥

३९३ इत्याभाषणरूपशीतलसुधावर्षैः स नीलाम्बुदो
दिक्पालाभिधचातकानसुरघर्मात्यन्तसंतापितान् ।
शुद्धान्तं समुपाविशत् सुविमलं संतर्प्य तृप्तास्तदा
ते च प्रापुरपारहर्षसहिता नीडान् गृहाख्यान् निजान् ॥९४

ओर्गण्टिवंशवर्धनलक्ष्मणयज्वप्रणीतकृतिवर्ये ।
संगतिलक्ष्मणसोदरकाव्येऽभवदत्र षष्ठसर्गोऽयम् ॥६॥

इति कविश्रीशंकरसोमयाजिसूनुलक्ष्मणयज्वकृतौ

श्रीमत्सीतारामविहारे महाकाव्ये

बिन्दुमाधवसाक्षात्कारोः नाम षष्ठः सर्गः ।

——:0:——

सप्तमः सर्गः

विश्वामित्रयोगोद्धरणम्

३५४ अथ हविर्भुजि पायसभाजनं करतले परिगृह्य महाद्युतिः ।
सकललोकविलक्षणपूरुषः कलकलध्वनिभिः समदृश्यत ॥ १

३५५ स च हुताशनतो बहिरद्भुतं समगमन्नटनं रचयन्निव ।
दशरथं यजमानमथाब्रवीत् सदसि तं मुनिमण्डलमध्यगम् ॥

३५६ नरपते बहुभाग्यवशादिदं समुपनीतमिहामृतपायसम् ।
तव सतीरुपभोजय भागतस्तदनु सन्ततिमेष्यसि शीघ्रतः ॥

३५७ इति वचः समुदीर्य स पूरुषः कुसुमवर्षणदुन्दुभिनिस्वनैः ।
इदमिलाधिपतेर्विपुलाञ्जलावुपनिधाय ततोऽन्तरधाल् लघु ॥

३५८ अथ सुतेष्टिविधानविशारदान् वसनभूषणभूरिधनादिभिः ।
स नृपतिः समतोषयदाचरन्नुचितमेव कृतज्ञधुरन्धरः ॥

३५९ तदनु पायसपात्रकरो भवन्नतिजवादवरोधमुपागमत् ।
स नृपतिः प्रविभज्य यथोचितं स्वमहिषीः समभोजयदादरात् ॥

३६० तदनु गर्भमधुः क्षितिपाङ्गना उपचितावयवाश्च बभुः क्रमात् ।
रशनया रहिता अभवञ् शनैरपि समस्तविभूषणभूषिताः ॥

३६१ दशरथस्य मनोरथपूरणं विदधिरे ननु गर्भधरा इमाः ।
मगधराजसुता वरकोसलप्रभुसुतापि च केकयकन्यका ॥ ८

३६२ समवलोक्य तुतोष स केतकीदलविपाण्डुकपोलतलोज्ज्वलाः ।
सुवदना अलसेक्षणशोभिताः सपदि मन्दगतिक्रमरञ्जिताः ॥ ९

३६३ मकरिकाकृतिपत्रमुखोज्ज्वला उपगता अभितः परिपाण्डुताम् ।
नवनवोदकपुष्टतनुप्रभाः सुवदनाः कलमा इव रेजिरे ॥

३६४ रहसि जिघ्रति स स्म वधूमुखान्युरुमृदासुरभीणि मुदा तदा ।
बहुदिनापगमे स्वमनोरथान् परिमलेन युतान् सममन्यत ॥

३६५ प्रतिदिनं क्रमशो घनपीवरप्रचुरपाण्डुविनीलमुखोन्नताः ।
शिखरलीनविनीलवना बभुर्हरिणभूमिधरा इव तत्कुचाः ॥

३६६ यदबला बहुदौहदुःखिता जगति दुर्मिलमप्यनुवव्रिरे ।
तदखिलं वनपालसमो भवन्नुपजहार नृपस्य सखा वृषा ॥

३६७ समुचितेषु दिनेषु गतेषु सा तदनु कौसलभूमिपतेः सुता ।
सुतमजीजनदिन्द्रमिवादितिः सकललोकगलोकसुखावहम् ॥

३६८ तदनु केकयराजसुता सुतं भरतमद्रिसुतासुतविक्रमम् ।
अजनयन् मगधेशसुता यमौ तदनु लक्ष्मणशत्रुहसंज्ञकौ ॥

३६९ कुसुमवृष्टिमुचो दिवि देवताः प्रजहृषुः कृतदुन्दुभिनिस्वनाः ।
सुखतरं मरुतो ववुरम्बरे सुविमलेऽप्सरसां ननृतुर्गणाः ॥

३७० सुतजनौ जनयन् जनरञ्जनं दशरथोऽकृत सूनुजनिक्रियाम् ।
गुरुबुधद्विजराजकवीश्वराः सपदि मङ्गलगान् समपूपुजन् ॥

३७१ रमयते जगतीतलवासिनः सकलयोगिजनानयमित्यमुम् ।
जगति राम इति प्रथिताभिधं जनशुभाय चकार गुरुः स्वयम् ॥

३७२ भुवनसंभरणाद् भरतोऽभवच् छुभदलक्षणतः स च लक्ष्मणः ।
सकलशत्रुहतेरिह शत्रुहा तत इमे भुवि सार्थकसंज्ञकाः ॥ १९

३७३ ववृधिरेऽश्विपुनर्वसुसप्रभा दशरथस्य सुताः प्रतिवासरम् ।
उपचितावयवा जनरञ्जनाः प्रतिपदुद्भवचन्द्रकला यथा ॥ २०

३७४ विधिवदाहितचौलमुखक्रिया नृपसुता मृगराजशिशूपमाः ।
अपि धनुर्धरणादिषु शिक्षिताः शुशुभिरे बहु तारकजेतृवत् ॥

३७५ कृतचतुर्दशशोभिचतुर्दशप्रकटभेदविभिन्नसरस्वती ।
अधिगता स्वचतुर्दशलोकसंभरणताप्रकटीकरणाय तैः ॥

३७६ दशरथस्तु निजात्मजमग्रजं प्रववृधे स विलोक्य दिने दिने ।
सकलपर्वसुपूर्णसुधाकरे समुदिते मुदितो जलधिर्यथा ॥

३७७ मुमुदिरे तमुदीक्ष्य दिने दिने नरपतेरवरोधवराङ्गनाः ॥
अपि सुतेषु समेषु समेषु ता इह विशिष्य मुदं दधिरे पराम् ॥

३७८ अनुससार स शैशवतोऽप्यमुं रघुपतिं मृगयादिषु लक्ष्मणः ।
प्रतिदिनं भरतानुचरोऽभवत् तदनुजश्च सहोदरवत् सदा ॥

३७९ अथ कदाचिदमुं सदसि स्थितं दशरथं प्रति कौशिक आगमत् ।
विदितवान् मुनिमागतमादरादुपजगाम नृपः प्रमुखं ततः ॥

३८० समुपवेश्य विचित्रकुशासने कुशिकनन्दनमेनमिलाधिपः ।
अवहितो मधुपर्कमथाचरद् वचनमप्युचितं समुपाददे ॥

३८१ सफलमद्य जनुर्मम हे मुने बहुदिनैर्भवदागमनं यतः ।
भवनमप्यवनं द्विजपद्रजःकणपवित्रमहो वनमन्यथा ॥

३८२ मम कुले क्व नु केन तपः कृतं
बहुषु जन्मसु तस्य फलं त्विदम् ।
मुररिपोरवतार इवान्यथा
कुत इहागमनं तु भवादृशाम् ॥ २९

३८३ सुखततेः मम सन्ततिसन्ततेस्तव निदानमिहागमनं ननु ।
उपवने फलपुष्पसमृद्धये पुरि यथा हि वसन्तसमागमः ॥ ३०

३८४ सकलराज्यधनाद्यहमप्यमी मम सुता त्वदधीनतरं त्विदम् ।
यदि तु कार्यमितो भवतो भवेद् वद मुने ननु तत् करवाण्यहम् ॥

३८५ इति मुखं वचनेन विभूष्य स प्रतिवचोऽवधि मौनमुपाददे ।
भुवि गभीरतराः प्रभुशेखराः प्रविदिता बहुधा मितभाषिणः ॥

३८६ तदनु वाचमुवाच मुनीश्वरो भवतु सत्यमिदं नृप ते वचः ।
न मम राज्यधनादिकलाभतो न भवतो भविता हि मनोरथः ॥

३८७ शृणु सुबाहुरणन्तमरीच इत्यनुपदं बहुधा मम दुःखदौ ।
बहुसहस्रगणैरपि राक्षसैर्मम मखस्य विघातकरौ सदा ॥

३८८ तदिह राजवरेण्य तवाग्रजं तनयमर्पय हस्ततले मम ।
तदुरुबाहुसमस्तनिशाचरप्रमथनेन मखं करवाण्यहम् ॥

३८९ तदुदितं विनिशम्य वचो नृपः पविनिपातनिपातितशाखिवत् ।
स निपपात वरासनसंस्तरे त्रुटितमध्य इवानिमिषं क्षणम् ॥

३९० तदनु जाङ्गलिकस्य वशं गतः प्रतिपदं भुजगेन्द्र इव श्वसन् ।
स नृपतिर्निजगाद मुनीश्वरं प्रविगतध्वनि दीनतरं वचः ॥

३९१ अह विधे मम कीदृशमुत्तरं श्रवणयोर्बत पातितवानसि ।
द्विजवरत्वमुपागतवत्यपि त्वयि गता न हि पूर्वकठोरता ॥

३९२ अहमदृष्टसुताननपङ्कजो
बहुदिनैरिममाप्य सुतं मुने ।
श्वसिमि तन्नयनाधिकमास ते
बत विधे ह ह हा करवाणि किम् ॥ ३९

३९३ क्व नु ममापि सुताः क्व नु बालकाः
क्व नु निशाचरयुद्धसमागमः ।
इति मुहुर्मुहुरद्भुतमाप्तवान्
विनिहताङ्गुलिरेष मुखोपरि ॥ ४०

३९४ स तमुवाच मुनेऽहमुपागतः सचतुरङ्गबलो विनिहन्मि तान् ।
न हि सुतं मम वत्समसूपमं मृदुपदं पथि नेतुमितोऽर्हसि ॥

३९५ नृपवितीर्णवचा अथ कोपनो भ्रकुटिमाकुटिलां रचयन् मुनिः ।
ज्वलनवत् कुपितोरगमृत्युवज् ज्वलति स स्म पुरान्तकरुद्रवत् ॥

३९६ स च वचोऽभिदधे नृप भाषसे
वचनमात्मकुलानुचितं ननु ।
रविकुले न हि कोऽपि भवादृशोऽ–
नृतवचा ददृशे न च शुश्रुवे ॥

३९७ अतिथये वितथं वदसीदृशं भवतु यामि सुखी भव भूपते ।
इति समुत्थितमात्रममुं मुनिं समुपवेश्य वसिष्ठ उवाच तम् ॥

३९८ रविकुलोद्भव राजवरेण्य किं तव भयं समुपागतमीदृशम् ।
वितर राममसुं कुशिकात्मजाद् बहु भविष्यति ते हि पुरः शुभम् ॥

३९९ इति ससूचनमुक्तवतीदृशं गुरुवरे वचनं विचचार सः ।
स्वमनसि क्षणमात्रमथाब्रवीद् रघुपते व्रज वत्स सलक्ष्मणः ॥

४०० सपदि तूर्णमगात् स धनुर्धरः शरधियुग्मयुतोभयकन्धरः ।
मुनिमनु त्रिशिरा इव पन्नगस्तमनुजोऽपि मृगेन्द्रमिवार्भकः ॥

४०१ अथ बलातिबले अददादसौ प्रशमनाय तयोः क्षुदुदन्ययोः ।
अपि च मन्त्रगणं बहुमुक्तवान् प्रहरणप्रतिसंहरणे अपि ॥ ४८

४०२ तदनु दूरतरं व्रजतामुना वसतयोऽपि च काश्चन लङ्घिताः ।
रघुवरेण वने बहु दुर्गमे मुनिरभाषि वनं किमितीदृशम् ॥ ४९

४०३ अथ वचोऽभिदधे मुनिशेखरः शृणु रघूत्तम मे गिरमादरात् ।
इह वनेऽस्ति हि काचन यक्षिणी जगति सुन्दवधूरिति विश्रुता ॥

४०४ वहति नागसहस्रबलं हि सा भवति गर्दभकोटिविराविणी ।
अतिकरालमुखी गजतुन्दिला विकटजानुविलम्बिपयोधरा ॥

४०५ गिरिबिलाभभयंकरनेत्रयोर्मलमलं दधती बहिराद्रवत् ।
विततलीक्षविमिश्रितयूकदुर्धरशिरोरुहलिप्तबहुव्रणा ॥

४०६ वदनगन्धविनिर्जितवान्तिकृद्वचनदुर्वचगन्धदुरासदा ।
गलविलम्बिनरान्त्रवपावसाकुलकपालचलाचलमालिका ॥

४०७ वनमिदं भुजतालकृताशनिप्रहरणैरमृगद्विजमानुषम् ।
अविवरं घनकण्टकसंकुलं विकलमातनुते खलु[1] ताडका ॥

पञ्चभिःकुलकम् –

४०८ यदि कदाचिदियं समुपागता न वनितेति कृपां कुरु राघव ।
यदनया जगदेव विनाशितं तदवनं न हि संप्रति सांप्रतम् ॥

४०९ वदति तत्र मुनाविति चाग्रतोऽशनिसमानविघर्घरनिस्वना ।
उपलवृष्टिमपाररजोभरैर्विकिरति स्म समन्तत एव सा ॥

४१० रिपुवधं कुरु राम किमीक्षसे मुनिवरे वदतीति सलक्ष्मणे ।
विशिखमम्बुदसृष्टपविप्रभं स विससर्ज पपात च सा भुवि ॥

४११ तदनु पुष्पमुचो दिवि देवताः प्रमुदिताः कृतदुन्दुभिनिस्वनाः ।
रघुपतिं परितोष्य मृदूक्तिभिस्तत उपागमदेष शनैः पुरः ॥ ५८

1. 'स्म हि' पाठान्तरम्.

४१२ द्रुतमुपेत्य मुनिर्निजमाश्रमं मुनिगणैः सकलैश्च पुरस्कृतः ।
रघुपतेर्धुरि तद्भुजपालितस्तदनुयागमथारभतादितः ॥ ५९

४१३ तदनु दीक्षितवेषधरे मुनौ शतमखं समुपाह्वयति स्वयम् ।
अथ सुबाहुरुपागमदद्भुतं शतमुखोऽहमिति क्रतुभक्षणे ॥

४१४ बहुसहस्रगणेऽपि राक्षसैः कलकलध्वनिभिश्च तदग्रजः ।
रुधिरवृष्टिभिरग्निमशीशमद् घनदर्षद्भिरताडयदृत्विजः ॥

४१५ विवसना विशिखाश्च पलायिता दिश इमे विदिशश्च पलायिताः ।
तदवलोक्य मुनिः समभाषत प्रभुवरेण्य किमर्थमुपेक्षसे ॥

४१६ जहि पुरस्थसमस्तनिशाचरानिति वदत्यतिसंभ्रमतो मुनौ ।
रघुपतिर्विशिखेन जघान तं युधि सुबाहुमबाहुमथाकरोत् ॥

४१७ स निपपात विशीर्णशिरोरुहः पशुरिवात्र विमस्तकितो भुवि ।
स पवनास्त्रहतस्तु तदग्रजः परसमुद्रतटेपतदुच्छ्वसन् ॥

४१८ तदवशिष्टबलं विनिहत्य तं मुनिवरं समुपस्थितवानयम् ।
कुशिकवंशभव क्रतुमञ्जसा परिसमाप्य हतारिरथाश्वसीत् ॥

४१९ कुसुमवृष्टिरभूद् दिवि दुन्दुभि –
ध्वनिभिरद्भुतमप्सरसां गणाः ।
धिमिधिमिद्धिमि तत्तकिटोमिति
ध्वनिततालसमं ननृतुस्तदा ॥

४२० इत्थं मुनिक्रतुविघातकृतः सुबाहु –
मारीचमुख्यदितिजान् विनिहत्य रामः ।
चापावरोपणपुरःसरमेत्य गाधि –
सूनोः स लक्ष्मणयुतः पुरतोऽवतस्थे ॥ ६७

४२१ सोऽपि प्रसार्य निजबाहुयुगं मुनीन्द्रः
श्रीरामचन्द्रमसकृद् द्रुतमुत्थितोऽसौ ।
आघ्राय मूर्ध्नि सहलक्ष्मणमाश्लिषत् स
प्रायः प्रियेषु भवतीदृशमेव लोके ॥ ६८

ओर्गण्टिवंशवर्धनलक्ष्मणयज्वप्रणीतकृतिवर्ये ।
सीतारामविहारे सप्तमसर्गोऽभवन् महाकाव्ये ॥७॥

इति श्रीओर्गण्टिशंकरसोमयाजिसुतलक्ष्मणसोमयाजिकृतौ

श्रीमत्सीतारामविहारे महाकाव्ये

विश्वामित्रयागोद्धरणं नाम सप्तमः सर्गः ।

———:०:———

अष्टमः सर्गः

सीतावर्णनम्

४२२ नीलाम्बुदोपमतनुं मुनिराबभाषे
यातानि कानिचिदिहैव दिनानि राम ।
शीघ्रं प्रयाहि पितरं मम शिष्यवर्गैः
सार्धं पुरैव बहु भीत इवास्ति भूपः ॥ १

४२३ सेयं मया मखततिः समपादि तेऽद्य
बाह्वोर्बलं श्रितवता निहताश्च विघ्नाः ।
यास्यामि तत्र मिथिलानगराधिनाथ –
यागे महीश्वरकुमारसमाजचित्रे ॥

४२४ किं तत्र चित्रमवनीशकुमारयागे
श्रोतुं ममाधिकृतिरस्ति यदीरयस्व ।
रामेण पृष्ट इति राजसभाप्रपञ्च –
माद्यन्तमद्भुततरं स मुनिर्बभाषे ॥

४२५ अस्त्यद्भुतात्र नगरी मिथिलेति नाम्ना
तस्यामसौ जनक इत्यवनीन्द्रचन्द्रः ।
तेनावनिं सपदि कर्षयताऽनुलब्धा
मञ्जूषिकावृततनुर्धरिणीकुमारी ॥

४२६ यस्माद् बभूव भुवि लाङ्गलपद्धतेः सा
सीतेति नाम स चकार कुमारिकायाः ।
संवर्धते स्म भवने जनकस्य बाला
सा बाल्ययौवनवयोऽन्तरमाजगाम ॥ ५

४२७ सा खेलति स्म वरकृत्रिमपुत्रिकाभिः
स्रस्तोत्तरीयमुरसि प्रचकर्ष चापि ।
धूलीश्च विक्षिपति खेलति वालुकासु
पुंसो निरीक्ष्य झटिति प्रपलायते स्म ॥ ६

४२८ बाल्यस्य सन्धिरतिनीच इतीव किं वा
सा यौवनस्य सखितामुररीचकार ।
तस्यास्त्रिलोकजयिनीं प्रवदामि राम
सौन्दर्यसंपदमये शृणु सावधानः ॥

४२९ लावण्यतोऽन्यवनिता तुलिता कथं वा
वाच्या मया यदबलावदनस्य शोभा ।
चन्द्रं निरस्यति वहन्ति विभूषणाय
तत्षोडशांशमपि शैलसुतादिरामाः ॥

४३० नूनं तमः प्रतिदिशं विनिहन्यमानं
चन्द्रेण तद्वदनराजसमीपमेत्य ।
दुःखं निजं गदितुमारभते स्म सोऽपि
तत्सोदरो विनिबबन्ध कचच्छलात् तत् ॥

४३१ पश्चाज् जुगोप चमरी निजचामरं यन्-
मूर्धाभिषिक्तवरकुन्तलकान्तिलेशम् ।
चौर्याद् गतं निजशिरोहरणेऽपि तस्य
नाशोऽस्तु मेति कृपणस्य कुतो विवेकः ॥

४३२ मन्ये यदीयनिटिलं कुटिलं सुधांशु –
मष्टम्युदीतमयमत्र ततो विशेषः ।
अल्पान्धकारसहितोऽपि न शोभतेऽसौ
गाढान्धकारकचभारयुतो यथायम् ॥ ११

४३३ शङ्के यदीयवदनं द्विजराजमत्र
चन्द्रेऽस्ति कश्चन ततोऽपि परो विशेषः ।
मूर्धावृतोऽयमभिभाति कचाम्बुदेन
पादैर्निहत्य च वनं न च शोभते सः ॥ १२

४३४ यस्या भ्रुवौ निजधनुः कुसुमायुधोऽसा –
वारोप्य चम्पकसुमं शरमत्र नासाम् ।
सन्धाय यौवनसखः कुचदुर्गभूमा –
वारुह्य विध्यति कदापि भवन्तमेव ॥

४३५ यस्या दृशौ मदनभिल्लकभल्लबाणौ
ताभ्यां हतं नु हृदयं यदि ते कदाचित् ।
स्वाधीनतां कथमुपैष्यति वत्स राम
मत्स्यो यथा निपतितो वनजालमध्ये ॥

४३६ कर्णौ श्रियैव तुलितौ निजरूपतुल्यं
यस्या वदन्ति कतिचिद् वरशष्कुली तौ ।
यत् किंचिदस्तु मम किं तव वक्त्रनिर्यच् –
चाटूक्तिभाषणरसज्ञतमाविमौ हि ॥

४३७ यस्यास्तु निर्मलतरौ[1] मसृणौ कपोलौ
भातस्तवैव तनुकान्तिविलोकनार्थम् ।
धात्रा कृताविति सदैव नरेन्द्रसूनो
मन्ये रहस्यतुलसुन्दरदर्पणौ तौ ॥

४३८ नासा सदैव तिलसूनसमं चकास्ति
सौन्दर्यमेव शनकैः स्रवदत्र यस्याः ।
नासाग्रलम्बिपरिभासुरपुष्पगा –
शोभां वहत्यतितरां श्वसितस्य योगात् ॥ १७

1. 'अत्यन्तनिर्मलतरौ' इति पाठान्तरम्.

४३९ ओष्ठं तु बिम्बफलमाहुरपि प्रवालं
रागाक्तसौधमृदुबुद्बुदमेव यस्याः ।
साक्षिण्यदोमुखविनिःसृतवाक्सुधैव
साक्षीभविष्यति भवान् यदि तत्र गच्छेत् ॥ १८

४४० यस्यास्तु कुन्दकलिकावलिवद् विभान्ति
दन्तास्तथापि मम भाति विशेष एषः ।
ताम्बूलरागकलनान् मणिपङ्क्तिरेषा
धात्रा कृता किमथ दाडिमबीजपङ्क्तिः ॥

४४१ वीणास्वरैः परभृतैः कलभाषणेषु[1]
वादं विधाय लुलिता रसना किमस्याः ।
रक्ताथवापि चतुरुत्तरषष्टिविद्या-
संमर्दतः किमथ कण्ठविसारिरागात् ॥

४४२ यत्कण्ठनालविवरं प्रतिपद्य साक्षात्
वाणी स्वराभ्यसनमातनुते हि बाला ।
अत्र प्रमाणमिदमेव चकास्ति वाणी
जिह्वैव सा यदिह सूक्ष्मतरं विभाति ॥
४४३ मन्ये विदेहतनयाचुबुकं सुधाभि-
रापूर्णवक्त्रचषकस्य विभाति मूलम् ।
आधारभूतमधराभिधकोटिलग्न-
वक्त्रस्य पानसमये तव पाणियोग्यम् ॥

४४४ कण्ठस्तु कम्बुरिति तत्र विचारणीयं
यस्याः किमस्ति ननु साक्षिण एव सन्ति ।
मुक्ताफलप्रकरभूरिसहोदरा ये
तिष्ठन्ति तत्र विरहासहनेन नूनम् ॥ २३

1. वीणास्वरेण परभृत्कलभाषणेन-इति पाठान्तरम्.

४४५ यस्या भुजौ तु ननु कल्पलते शृणु त्वं
राजेन्द्रपुत्र वयमेव हि साक्षिणोऽत्र ।
बाल्यात् प्रभृत्यनुदिनं पितुराज्ञयास्या
नादेयमस्ति करपल्लवतल्लजाभ्याम् ॥ २४

४४६ यस्याः सुवर्णरचिताङ्गुलिलेखिनीनां
लाक्षारसाञ्चितनखाग्रविलेपिनीनाम् ।
शृङ्गारवक्रवचनैरनुरज्य लेख्या
योग्या तवैव शुभसूचकपत्रिका स्यात् ॥

४४७ यस्यास्तनू रुचिरहेमविचित्रवेदि–
राराधनाय तव मन्मथदेवतायाः ।
लावण्यपूर्णकलशौ रसपूर्णशङ्खौ
यत्रार्पिताः सपदि यौवनसेवकेन ॥

४४८ त्वद्वक्त्रभानुपरिचुम्बनतो विकासाल्
लावण्यनाममकरन्दभरं किरन्तौ ।
यस्याः स्तनौ तु तव मानसराजहंस–
सन्तोषयिष्यदुरुपीवरपद्मकोशौ ॥

४४९ यस्याः परस्परनिवेशनसंजिघृक्षा–
वेशेन वर्षणमहर्दिवमाचरन्तौ ।
हारः कुचौ निजशिरःपरिचालनेन
वक्तीव रामकरमर्दनमेव वा स्यात् ॥

४५० नाभ्यालवालजलतां प्रवदन्ति केचिद्
रोमावलिं फणिशिशुं तनुधूमरेखाम् ।
ब्रूमो वयं यदुद प्रतिबिम्बमेव
पश्चाद्विलम्बि बहुदीर्घविनीलवेण्याः ॥ २९

४९१　यस्या वलित्रयमहो प्रतिभाति हेम–
सोपानपङ्क्तिरिव यौवनशिल्पिबद्धा ।
श्रीराम तावकमनोरथराजसिंह–
संप्रापणाय कुचपर्वतदुर्गभूमौ ॥ ३०

४९२　यस्यास्तु मध्यमवलोक्य वदन्ति केचि–
दस्तीति नास्त्यनुपलब्धिवशादथान्ये ।
नास्त्यस्ति वेति कतिचिद् बहुधास्ति नो चे –
दस्याः कुचद्वयगिरीन्द्रधृतिः कथं स्यात् ॥

४९३　नाभिर्विभाति तव राम मनोरथस्य
क्रीडासरः किमथ तस्य तपोगुहा वा ।
एकान्तमेत्य सगुणस्य तु तत्स्वरूप–
ब्रह्मात्मनोऽनवधिसन्ततिचिन्तनाय ॥

४९४　यस्या नितम्बवरपर्वतसंविलग्ना
लावण्यमूर्तिझरिणी द्युतिसत्तरङ्गा ।
वक्त्राम्बुजा वहति चञ्चलनेत्रमीना
पीनोन्नताद्भुतपयोधरचक्रवाका ॥

४९५　यस्या नितम्बयुगलं रथचक्रयुग्मं
तद्युक्तवृत्तवरबाहुयुगं तदीयम् ।
देहं रथं समधिरुह्य मनोरथस्ते
चित्रं धरिष्यति मृगीदृशि चञ्चलत्वम् ॥

४९६　ग्रीष्मेऽतिशीतलतरौ मृदुलौ यदूरू
रम्भां निरस्य जयतः शिशिरेऽपि शीतम् ।
हेमन्तशैशिरदिनेषु हितौ तनूष्णौ
ग्रीष्मे परौष्ण्यसहितान् रविकान्तकाण्डान् ॥ ३१

४५७ जङ्घाद्वयं जयति काहलमूर्ध्वभाग–
संलग्नदर्पणनिभामलजानु यस्याः ।
शङ्के यदीयपदमागसि सन्नतादि–
कूर्मं नु किं प्रपदमेव भवेद् रमायाः ॥ ३६

४५८ पादाश्रितां दशनखद्विजराजपङ्क्तिं
दृष्ट्वा कलङ्करहितां जनकात्मजायाः ।
कार्श्यं प्रयाति दिवसे दिवसे कलङ्की
चन्द्रो निराश्रयजनं कथयन् स्वतुल्यम् ॥

४५९ एतादृशीं समवलोक्य जना वदन्ति
किं किन्नरी निपतिता किमु तारका वा ।
देवाङ्गनाऽथ चपला चपला भवेत् किं
निर्भिद्य भूमिमुदिता किमु नागकन्या ॥

४६० तां तादृशीमुपविलोक्य दिने दिनेऽपि
चिन्तां प्रयाति जनकः पृथिवीतनूजाम् ।
अस्या विवाहविधये कतमो वरो वा
योग्यो भवेदिति विचिन्त्य मतिं चकार ॥

४६१ माहेश्वरस्य धनुषो मयि देवताभिर्
न्यासीकृतस्य यदि कोऽपि भवेत् समर्थः ।
आरोपणाय स भवेद् वर एतदीय
इत्यादरेण कृतवान् भुवि विश्रुतिं सः ॥

४६२ आकर्ण्य तद्वचनमत्र महीतले ये
पञ्चाशदुत्तरषडादिमहेशवीराः ।
आसज्य तस्य धनुषः परिचालनं च
कर्तुं न शक्यमिति ते पुनरेव याताः ॥ ४१

४६३ श्रुत्वा वचः सपदि सात्त्विकभावतोऽन्तर्
लालां गिलन्तमभितः पुलकाञ्चिताङ्गम् ।
प्रस्विन्नगात्रमुरुकम्पमुदीक्ष्य रामं
विज्ञाय भावमथ तस्य मुनिर्बभाषे ॥ ४२

४६४ श्रीरामचन्द्र यदि बुद्धिरितोऽनुधावे –
दायाहि मङ्गलमवाप्स्यसि नात्र चित्रम् ।
त्रैलोक्यदुष्करमपीह भवान् विदध्याद्
इत्येव वेद्म्यहमपि प्रयतस्व शीघ्रम् ॥

४६५ इत्यादितः सकलमप्यवधार्य वाक्यं
गाधेः सुतस्य तमुवाच रघुप्रवीरः ।
स्वामिन् गुरोरनुगतोऽहमिहाज्ञया त्वां
मां शाधि यन् मम हितं कुरु तत् त्वमेव ॥

४६६ एतन् निशम्य वचनं मुनिरप्यनेक–
शिष्यैः समं तमुपगृह्य सलक्ष्मणं तम् ।
प्रत्युज्जगाम विपिनानि विलङ्घ्य तत्र
यत्रास्ति गौतमवधूः प्रविलुप्तदेहा ॥

४६७ रामोऽपि तत्र दृषदि प्रविसार्य पादं
विश्रान्तये समुपवेष्टुमियेष यावत् ।
तावद् द्रुतं समुदतिष्ठदसौ सती सत् –
सौन्दर्यभासुरशरीरसमेतकान्तम् ॥

४६८ तच् चित्रमाप्तमथ राघवलक्ष्मणाभ्यां
मन्दस्मितं मुनिवरोऽपि बभूव तूष्णीम् ।
तस्मिंस्तु गौतममुनिः क्षण एव तत्र
प्रादुर्बभूव मधुपर्कमथाकरोत् सः ॥ ४७

४६९ तामप्यथानुजगृहे स्ववधूमहल्यां
तेषां तदापचितिमादरतश्चकार ।
संकीर्तितप्रथमवृत्तकथस्तु तावद्
वध्वा सह प्रमुदितः स तपश्चचार ॥ ४८

४७० तेऽपि प्रसन्नहृदयाः परिचक्रमुस्तं
देशं विहाय मिथिलाधिपराजधानीम् ।
तानागतान् स जनकोऽपि निशम्य राजा
प्रावेशयत् प्रमुखमेत्य पुरं स्वकीयम् ॥

४७१ रघुपतिरसौ तातादेशादनुव्रजति स्म तं
मुनिवरमथो दुष्टां हत्वा हठात् पथि ताटकाम् ।
तदनु च मुनेर्यागं भृत्वा निहत्य निशाचरान्
दृषदमपि सत्कान्तां कृत्वागमन् मिथिलां ततः ॥ ५०

ओर्गण्टिवंशवर्धनलक्ष्मणयज्वप्रणीतकृतिवर्ये ।
सीतारामविहारे त्वष्टमः सर्गोऽगमन् महाकाव्ये ॥८॥

इति श्रीशंकरसोमयाजिसूरिसूनुलक्ष्मणसोमयाजिकृतौ

श्रीमत्सीतारामविहारे महाकाव्ये सीतावर्णनं

नाम अष्टमः सर्गः ।

———:0:———

नवमः सर्गः

सीताविवाहवर्णनम्

४७२ अथ प्रहृष्टो मिथिलाधिनायकः समागते कौशिकवंशवर्धने ।
प्रवेश्य तं राघवलक्ष्मणान्वितं समर्चयामास यदृच्छयागतम् ॥ १

४७३ तमर्घ्यपाद्यादिभिरासने स्थितं प्रपूज्य वाचंयममाददे वचः ।
अहं कृतार्थोऽस्मि मदीयपूरुषाः पुरातनास्तातपितामहादयः ॥

४७४ इतः परं भद्रपरम्परा भवत्कटाक्षदृष्ट्या प्रभविष्यति ध्रुवम् ।
तथापि लोकत्रयदुर्लभं भवद् भवादृशां किं कुरुते न वीक्षणम् ॥

४७५ इमौ कुमारौ मृगराजविक्रमौ धनुर्धरौ दीर्घविशाललोचनौ ।
विनीललोलालकफालसुन्दरौ कवाटवक्षोयुगबाहुबन्धुरौ ॥

४७६ उभौ यदृच्छागतदेवभासुरौ दिवः सकाशात् पृथिवीविलासतः ।
निजस्वरूपेण पुनर्वसूपमौ सुरूपतो मे मतिरश्विनाविति ॥

४७७ सुवर्णपीताम्बरधारणोज्ज्वलौ समुज्ज्वलत्कङ्कणहारकुण्डलौ ।
वरासितूणीरधरौ पराक्रमे कुमारकल्पौ बहुधा भविष्यतः ॥

४७८ तरुण्यनुह्लाद्यसमानयौवनौ तरण्यनल्पेन्दुसमानतेजसौ ।
स्वतेजसा भासयतो दिगन्तरं कथं नु पद्भ्यां पथि दूरमागतौ ॥

४७९ उभौ प्रमाणेङ्गितचेष्टितैः समौ परस्परं भाषणपोषणादिभिः ।
अनेकजन्मार्जितपुण्यसम्पदो नृपस्य पुत्राविह कस्य हे मुने ॥ ८

४८० किमर्थमात्रागमनं वदेतयोर्मुने त्वया सार्धमिहासहाययोः ।
स एवमुक्तः प्रतिवाचमाददे पुरोहिते शृण्वति कौतुकावृते ॥ ९

४८१ अथादितस्तादृगनुक्रमेण तत्कथां परिश्राव्य पुनर्वचोऽवदत् ।
इमावयोध्याधिपतेरिहात्मजौ समागतौ चापविलोकनोत्सुकौ ॥

४८२ शृणोतु राजन्नवधानतो वचो मदुच्यमानं सपुरोहितो भवान् ।
सभासदो येऽत्र वसन्ति ते गृहे समेत्य शृण्वन्तु सकौतुकं वचः ॥

४८३ नरस्य लोकोत्तरजन्म दुर्लभं जनावपि प्राज्ञतमः कुतो भवेत् ।
भवेदिह प्राज्ञतमोऽपि मानुषः कुतस्तु सौजन्यमथास्य विद्यते ॥

४८४ भवेत् कदाचित् सुजनोऽपि पूरुषः गभीरता तस्य समुद्रवत् कुतः ।
गभीरताप्यस्तु तथापि तन्नृपे विशेषदातृत्वमनेन दुर्लभम् ॥

४८५ कदाचिदप्यस्तु विशेषदातृता प्रभुत्वमन्यादृशमस्य कुत्र वा ।
प्रभुत्वमप्यस्तु तथापि तस्य सा दया तु दीनेषु खपुष्पमेव हि ॥

४८६ दया कदाचिद् भवतीति वक्षि चेत्
कुतस्तु दाक्षिण्यमिहास्ति मानुषे ।
तदप्यलं स्यादुचितज्ञतावनौ
समात्मना स्याच् छशशृङ्गमेव हि ॥

४८७ कदापि सा कस्यचिदस्ति भाग्यतः
सुदूरमौदार्यमिलाधिपे भवेत् ।
क्वचिज् जने तच्च भवेन् महीतले
परन्तु धैर्यं बहुधा हि दुर्लभम् ॥

४८८ तदप्यहो पुण्यवशेन लभ्यते समानशीलास्तु सहोदराः कुतः ।
सहोदरेष्वप्यसमान ईदृशः पराक्रमो भाग्यवशेन लभ्यते ॥ १७

४८९ इमे गुणास्तात पितामहादिभिः कृतेन पुण्येन वसन्ति पूरुषे ।
अनन्तकल्याणगुणे रघूत्तमे गुणा अमी केचिदुदाहृता मया ॥ १८

४९० तदत्र बालोऽयमितीदृशीं मतिं विहाय यज्ञावसथाङ्गणे धनुः ।
समानय क्षिप्रमसौ रघूद्वहः पराक्रमं स्वं परिदर्शयिष्यति ॥

४९१ इतीरितं तज् जनको निशम्य तं मुनिं बभाषे मुदितेन चेतसा ।
शृणु त्वमेतस्य धनुर्वरस्य ये विधातुमारोपणमागता इह ॥

४९२ कलिङ्गवङ्गाङ्गजनाधिनायकाः सपाण्ड्यपाञ्चालविराटभूमिपाः ।
सबर्बरान्ध्राधिपकेकयेश्वराः सुराष्ट्रसौवीरककोङ्कणाधिपाः ॥

४९३ इतोऽपि भूनायकवीरशेखराः परे समागत्य पुरेऽत्र संभ्रमात् ।
प्रतोलनं कर्तुमपि प्रचालनं न चाशकन् साग्रहमागता अपि ॥

४९४ अयं दुराधर्षपराक्रमो यदि त्वधिज्यमेतद् धनुरातनिष्यति ।
मनोरथो मे मुनिशेखराधुना तव प्रसादात् सफलो भविष्यति ॥

९५ इतीरयित्वा नृपतिः स्वसेवकैरनीनयत् तत्र धनुर्महोन्नतम् ।
स दर्शनादेव मुनीश्वराज्ञया शरासनस्याग्रमुपागमत् स्वयम् ॥

४९६ स यक्षविद्याधरकिन्नरामरप्रभुद्विजेन्द्रावनिनाथसन्निधौ ।
शरासनाग्रस्य कराभिमर्शनादतोलयज् ज्यां च हठादयोजयत् ॥

४९७ फलफलफलध्वानैरेतद् धनुस्त्रुटितं ततः
पटपटपटत्पाटच्चेति प्रदीर्णमहोऽम्बरम् ।
तदनु शिरसः कम्पं चक्रे ध्वनिं प्रतिशुश्रुवान्
पशुपतिरसौ भूयो भूयो विचिन्त्य महेश्वरः ॥

४९८ तदा कृतं कार्मुकभङ्गमद्भुतं रघुप्रवीरेण निरीक्ष्य देवताः ।
अतीवकोलाहलशब्दपूर्वकं सदुन्दुभिध्वानमवाकिरन् सुमैः ॥ २७

४९९ तदद्भुतं संसदि रोमहर्षणं विधाय चापस्य विभञ्जनं लघु । २८
रघुप्रवीरो रणचण्डविक्रमो मुनीश्वरस्यान्तिकमाजगाम सः ॥

५०० ततो विदेहाधिपतिर्मुनीश्वरं जगाद तोषेण सगद्गदस्वरः ।
अहं कृतार्थोऽस्मि मदीयकन्यका कुलस्य कीर्तिं समुपाहरिष्यति ॥

५०१ मुने व्रजन्त्वद्य मदीयमानुषा झटित्ययोध्यां प्रति बुद्धिशालिनः ।
इमां कथां पङ्क्तिरथे निवेद्य तं समानयिष्यन्ति च शीघ्रमेव ते ॥

५०२ तथेत्यनुज्ञां प्रतिलभ्य कौशिकान् मनुष्यवर्या महनीयवाहनाः ।
नियोजितास्तेन बहुत्वरान्विता ययुः पुरं पङ्क्तिरथेन पालिताम् ॥

५०३ ततस्त्वयोध्याधिपतिं प्रणम्य ते सुते शुभोदन्तमथाचचक्षिरे ।
सुतस्य तत्कर्म निवेद्य भूमिजाविवाहयोगं च विशेषतोऽवदन् ॥

५०४ ततो वसिष्ठं च सुमन्त्रमन्त्रिणं स शीघ्रमाकार्य विधेयमूचिवान् ।
अये श्रुतं राघवलक्ष्मणावुभौ मुनीश्वरानुग्रहतः सुखं स्थितौ ॥

५०५ निशाचराणां वधमारचय्य तौ मुनीन्द्रयुक्तौ मिथिलां गतौ किल ।
धनुर्विभङ्गं च विधाय राघवः स्ववीर्यशुल्कां जनकात्मजामथ ॥

५०६ विवोढुकामो जनकस्य मन्त्रिणो
विसृष्टवान् कौशिकसम्मतेन सः ।
विचित्रमेतद् भवतीव मे मतौ
विचार्यमाणे मुनिचेष्टिते ननु ॥

५०७ कथंसमाचार इतः कथंकुलः कथंचरित्रः कथमस्य सन्ततिः ।
निवेद्यतां तस्य कथं परंपरा विवाहयोगो हि विचारमर्हति ॥

५०८ इतीरिते पङ्क्तिरथेन तौ तदा विमृश्य कार्यस्य विशेषमात्मनि ।
परस्परं चाप्यनुमन्त्र्य सर्वतः प्रभोः पुरस्तात् प्रतिवाचमूचतुः ॥३७

१०९ स सोमवंश्यो ननु सूर्यवंशजस्त्वमेष वैदेह इतीर्यते बुधैः ।
त्वमप्ययोध्याधिपतिः कुलं त्विदं सुशीलमप्यत्र निवेद्यते शृणु ॥३८

११० सदा स वेदान्तविचारशीलवान्
भुवि त्वमिन्द्रस्य सखेति गीयसे ।
सुशीलमेतत् किल सन्ततिस्त्वियं
महीसुता सा हरिरेष विक्रमे ॥

१११ अयं विवाहो भवतोः समानयोः कुलेन शीलेन च शोभतेतराम् ।
अतः परं शीघ्रमितो व्रज प्रभो शुभस्य शीघ्रं प्रवदन्ति साधवः ॥

११२ ततो महीन्द्रस्य निदेशतो ययुः पुरे समन्तादपि वेत्रपाणयः ।
कराग्रवेत्रभ्रमणेन धावनं विधाय सैन्यं प्रतिवीथ्यचालयन् ॥

११३ गजा रथा वीरभटास्तुरंगमाः क्षणेन राज्ञः समुपस्थिताः पुरः ।
स्त्रियः पुमांसश्च विलासलालसा नटा भटा मर्दलवादनोद्भटाः ॥

११४ मृदङ्गवीणापणवाणकोज्ज्वला दशावताराभिनये धुरंधराः ।
प्रतस्थिरे वेषधरैन्द्रजालिका गुणे च वंशे च विनर्तनक्षमाः ॥

११५ सशिल्पिशैलूषविदूषका अपि प्रतस्थिरे वारवधूगणास्तदा ।
जना इतोऽष्टादशवर्णसंमिता रघुप्रवीरस्य विवाहकारणात् ॥

११६ करोज्ज्वलद्भल्लकसौविदल्लकाः कुठारकुद्दालकसंयुताः परे ।
पुरो ययुर्मार्गविशोधने रताः प्रपाकरा हट्टकरा ध्वजोत्कराः ॥

११७ वसिष्ठमुख्यद्विजमन्त्रिशेखरैरुपेतपार्श्वोऽमरनाथवैभवः ।
ततः प्रतस्थे नृपतिः सडिण्डिमैर्मृदङ्गनादादिभिरात्तमङ्गलः ॥

११८ विलङ्घ्य सर्वा वसतीः क्रमेण स प्रयातवांस्तज्जनकस्य पत्तनम् ।
स चाभिमुख्येन समस्तभूसुरैर्गजै रथैरश्वगणैः सहागतः ॥ ४७

९१९ ततस्तयोः सैन्यमपारभासुरं परस्परं चाभिमुखं समागतम् ।
निरीक्ष्य लोका बहुधेति मेनिरे समुद्रयुग्मं किमु संमुखागतम् ॥४८

९२० पुरं समानीय विदेहनायकस्ततस्त्वयोध्याधिपतिं मुदा तदा ।
उपाचरत् सर्वविधोपचारतस्तदुन्नतिं स्वं विनयं च दर्शयन् ॥

९२१ अथ प्रभाते विमले सभासदां वसिष्ठगाधेयमुखद्विजन्मनाम् ।
पुरः समाभाषत चक्रवर्तितापदं प्रपन्नो जनको विनीतवत् ॥

९२२ मदीयभाग्येन समागतो भवान् ददामि सीतां भवदग्रसूनवे ।
ममात्मजां भूमिपते तथोर्मिलां गृहाण सौमित्रिविवाहहेतवे ॥

९२३ कुशध्वजस्यायतलोचने च ये प्रभो मदीयावरजस्य कन्यके ।
करं गृहीतुं भरतस्तयोः क्रमादयं च शत्रुघ्न इहार्हतो ननु ॥

९२४ इदं तु गाधेयमतेन चिन्तितं मयैव पूर्वं स्वपुरोहितेन च ।
यथा हि राजेन्द्र तवानुरोचते[1] तथा कुरुष्वात्मजमङ्गलक्रियाम् ॥

९२५ इतीरितस्तेन स राजशेखरस्तदुत्तरं सस्मितमूचिवानयम् ।
वयं तु दातस्त्वदधीनतां गता यदत्र ते रोचत एव तच्च मे ॥

९२६ इतीरयित्वा नृपतिः समुत्थितः सुतेषु गोदानविधिं विचिन्तयन् ।
इहापि कन्याः कृतमङ्गलक्रियाः विशुद्धवस्त्राभरणैश्च भूषिताः ॥

९२७ स्वतोऽपि वैदेहसुताऽतिशोभना तथापि सैरन्ध्रिकया प्रयत्नतः ।
पदाङ्गुलीयैश्च कराङ्गुलीयकैरलंकृता स्वर्णलतेव सा बभौ ॥

९२८ सुवर्णभास्वत्तरहंसकोज्ज्वला करार्पितोद्यद्वरकङ्कणाञ्चिता ।
रणंरणंनूपुरभासुराङ्घ्रिका कटीलसत्किङ्किणिमेखलावृता ॥ ९७

---

1. 'यथाहि राजन्ननु तेऽनुरोचते' इति पाठान्तरम्.

९२९ सुवृत्तबाह्वोर्वलयानुरञ्जिता विशालकेयूरयुगोज्ज्वलद्भुजा ।
निशीथिनीचारिगुरूपमोज्ज्वलद्विशुद्धनासाभरणेन भासुरा ॥९८

९३० अमूल्यकण्ठाभरणेन रञ्जिता विशालमुक्ताफलपट्टभाद्गला ।
उरोल्लसत्पाण्डुरहारभासुरा कनत्कनन्माणवकैकयष्टिका ॥

९३१ उरोजभूशाल्युडुमालिकोज्ज्वला धगद्धगत्त्विट्पदकाञ्चितोदरा ।
विशुद्धगोमेधिकपुष्परागयुग्विभासिवैडूर्यसवज्रकुण्डला ॥

९३२ विलम्बिमुक्ताफलकर्णपार्श्वयुक्सुवर्णपुष्पाङ्कितसुन्दरानना ।
विशिष्य कर्णोपरिभागभासुरप्रभासमालिङ्गितवृत्तभूषणा ॥

९३३ विशुध्दमुक्ताफलजालफालदिग्विलम्बमानातिचलल्ललन्तिका ।
लसल्ललाटोभयपार्श्वकुण्डलप्रलम्बिपङ्क्तित्रयमौक्तिकावलिः ॥

९३४ विनद्धनानाविधरत्नचञ्चलप्रभादिगुद्भासिकिरीटमस्तका ।
इयं समस्ताभरणैरलङ्कृता बभूव साक्षात् कमलेव जानकी ॥

९३५ अनेकनेपथ्यविभूषिता इमाः प्रपेदिरे स्वस्वविवाहवेदिकाम् ।
नरेन्द्रपुत्रा अपि पूर्वमेव ते पुरोहितैः सार्धमिहागताः स्थिताः ॥

९३६ वितेनतुर्द्वौ मधुपर्कमादितो नृपोऽपि तेषां सकुशध्वजोऽनुजः ।
सुवर्णवस्त्राभरणैरलंकृता विनिन्यतुस्तद्वरसंमुखं वधूः ॥

९३७ वधूवरान् प्रत्यधुरन्तरा पटं बुधा इहाचारविदः[1] सभासदः ।
अपीपठन्नप्यथ मङ्गलाष्टकं ससावधानं प्रतिपद्यमन्ततः ॥

९३८ ततः शतानन्दवसिष्ठमुख्यतत्पुरोहिता वेदविधानपूर्वकम् ।
प्रपठ्य मन्त्रान् वरसुन्दराञ्जलौ निधाय कन्याकरपल्लवद्वयम् ॥९७

---

1. 'अथाचारविदः' इति पाठान्तरम्.

९३९ प्रदापनं तत्प्रवरानुवादतः प्रकुर्वते स्म प्रतिपूरुषं ततः ।
विदेहनाथस्तु विशिष्य राघवं प्रदानकालोचितवाचमूचिवान् ॥ ६८

९४० इयं महाराजकुमार तावके समस्तधर्माचरणेऽपि राघव ।
मदीयकन्या सहचारिणी भवेदिति प्रचिक्षेप जलं तदञ्जलौ ॥

९४१ ततस्तु पाणौ जनकात्मजां मुदा गृहीतवान् राघववंशवर्धनः ।
स लक्ष्मणश्चापि तदोर्मिलाकरं करेण जग्राह नरेश्वरार्पितम् ॥

९४२ कुशध्वजेनार्पितमत्र माण्डवीकरं मुदाऽसौ भरतोऽग्रहीद् वरम् ।
ततस्त्वगृह्णाच्छ्रुतकीर्तिसद्वधूकरं स शत्रुघ्न उदारदर्शनः ॥

९४३ ततः परं मङ्गलसूत्रमादितः सुमङ्गलीसत्करसंपुटार्पितम् ।
वरा वधूकम्बुगलेषु संभ्रमाद् बबन्धुरन्योन्यविलोकनोत्सुकाः ॥

९४४ विशुद्धमुक्ताः सहपाण्डुराक्षता अवाकिरन् मूर्धसु ते वधूवराः ।
परस्परं स्वाञ्जलिभिस्तदाभवत् तदीयमातापितृलोचनोत्सवः ॥

९४५ वधूवरान्योन्यकटाक्षवीक्षणं
प्रदक्षिणाप्रक्रमणे विभावसोः ।
निरीक्ष्य सर्वेऽपि मुदान्विता बभुः
स्त्रियः पुमांसः स्मितशोभिताननाः ॥

९४६ चक्रुस्तदा सप्तपदादिकं ते वैवाहिकं पञ्चदिनोत्सवं च ।
नृपोऽपि विप्रान् परिपूज्य सर्वानभोजयत् स्वाश्रितबन्धुवर्गान् ॥

९४७ दत्त्वा देयं सुताभ्यो बहुधनवसनाभूषणाश्वाविकाद्यम्
दासीदासादिदायं दशरथनृपतेश्चापि योग्यं धनादि ।
भूयो जामातृवर्गं बहुविधविभवैस्तोषयित्वाश्वसङ्घान्
दत्त्वा चाखेटयोग्याञ् जनकनरपतिः प्रेषयामास सर्वान् ॥ ७६

९४८ आमन्त्र्य तं जनकभूपतिमेष राजा
संतोषवान् दशरथः स्वसुतान् वधूश्च ।
बन्धून् द्विजांश्च चतुरङ्गबलं गृहीत्वा
गङ्गातटेऽथ वसतिं प्रथमां चकार ॥ ७७

ओर्गण्टिबंशवर्धनलक्ष्मणयज्वप्रणीतकृतिवर्ये ।
सीतारामविहारे नवमः सर्गोऽगमन्महाकाव्ये ॥९॥

इति श्रीओर्गण्टिशंकरसोमयाजिसूरिसूनुलक्ष्मणयज्वकृतौ

सीतारामविहारे महाकाव्ये

सीतारामविवाहो नाम नवमः सर्गः ।

——:०:——

दशमः सर्गः

उद्यानविहारः

५४९ ततोऽनुगङ्गानदि सालतालतमालमालाकलिते महीन्द्रः ।
वनप्रदेशे मिथिलोपकण्ठं विराजमाने शिबिरं व्यतानीत् ॥ १

५५० दिगन्तदेशेश्वरदीयमानान् ससैन्धवारट्टहयान् स तत्र ।
काम्भोजबाह्लीकमहातुरङ्गान् दशाश्वुवाद्यैर्जगृहे परीक्ष्य ॥

५५१ तत्रैव हेमन्तदिनेषु गङ्गातीरे वनेषूपवनेषु सज्जाः ।
आरेभिरे राजकुमारवीरा आखेटमारूढमहातुरङ्गाः ॥

५५२ आबद्धवज्राङ्कितवारबाणाः कटिप्रदेशाञ्चितखड्गयुग्माः ।
पश्चाद् द्विपार्श्वोऽव्यगतुङ्गतूणा धनुर्धरास्ते बभुरर्कतुल्याः ॥

५५३ समानवेषैश्च समप्रमाणैः समस्तदेशागतराजपुत्रैः ।
धृतोच्चकुन्तैर्दिविजोपमानैरारूढवाहैरभितोऽनुयाताः ॥

५५४ भिल्लैः प्रफुल्लोद्गतरोमपुञ्जैरग्रेसरैर्धीवरधीवरैश्च ।
आवार्य सर्वत्र च वागुराभिर्वने श्वभिः श्वापदधारणोत्कैः ॥

५५५ वराः कुरङ्गा रुरवश्चमर्यः खड्गाः शशाः पुष्कलका वराहाः ।
उड्डीय चोड्डीय च धावनेन कुञ्जेषु कुञ्जेषु विगूहमानाः ॥

५५६ ये तत्र वेगेन पलायमाना मृगा अदृश्यन्त विदिक्षु दिक्षु ।
अदीधरंस्ताननतिवेगधावितुरङ्गमोल्लङ्घितघट्टकुञ्जाः ॥ ८

९५७ विहायसोड्डीय विहारशीलान् श्येनैः पतङ्गानपि पातयन्तः ।
इतस्ततश्चाप्यनुधावनेन श्रान्ता अगुर्निर्झरिणीतटं ते ॥ ९

९५८ तत्रावतीर्य प्रविसार्य जालजालानि नद्यामथ धीवरास्ते ।
दध्रुस्तिमीन् मद्गुरशिशुमारपाठीनमीनान् गडकान् सकूर्मान् ॥

९५९ ततस्तु सौमित्रिरुवाच रामं भ्रातः प्रपश्यात्र गजोऽतिशैत्यात् ।
प्रसार्य शुण्डां जलपानहेतोरङ्गारलग्नाङ्गुलिवन् न्यकुञ्चीत् ॥

९६० विदार्य सर्वावयवान् जनानां वहत्ययं हैमनगन्धवाहः ।
वनेषु पुष्पैश्च फलैः समृद्धा शोभा तथा नैव निरीक्ष्यतेऽत्र ॥

९६१ मरुद्विशीर्णाखिलपर्णजालजटाकलापं शिरसा वहन्तः ।
तपश्चरन्तीव विभान्ति रम्भास्तम्भा वसन्तश्रियमाप्तुकामाः ॥

९६२ सीत्काररोमाञ्चविदीर्यदोष्ठव्रणान् दरिद्रेषु धनाधिकेषु ।
ददात्यसौ हैमनवातदाता तस्यान्नदस्येव न पक्षपातः ॥

९६३ पश्यात्र पद्मानि तपश्चरित्वा शरत्सु नीरे निजकण्ठदघ्ने ।
सूर्यावलोकेन तपःसमाप्तौ मुक्तिं गतानीव वसन्ति नैव ॥

९६४ इयं तु भूमिः शिशिरे विभाति नवीनगोधूमयवाङ्कुराग्रैः ।
नीरन्ध्रगारुत्मतरत्नकान्तिव्याप्तेव नेत्रोत्सवदा समन्तात् ॥

९६५ इदं विचित्रं भवतीह काले जना हसन्तीं दिवसेऽपि रागात् ।
ऊर्वन्तराले विनिगूह्य सम्यगालिङ्ग्य तिष्ठन्ति न चोपहास्याः ॥

९६६ इतीरिते लक्ष्मणपूर्वजातो निजानुजेन स्मितसुन्दरास्यः ।
समस्तसैन्यावृतसर्वपार्श्वः सुवर्णशृङ्गं शिबिरं जगाम ॥

९६७ हेमन्ततत्प्रान्तदिनेषु सौख्यमुष्णोदकान्नाप्लुतिभोजनादेः ।
वध्वा सहैकान्तविहारजन्यं दिनान्ययं कानिचिदन्वबोभूत् ॥ १९

९६७ ततो लतातन्तुमतुच्छगुच्छप्रसेवकां पल्लवपर्वरम्याम् ।
रसालवीणां विटपप्रवालां स्पृशञ् शुकीतुण्डमुखैर्नखाग्रैः ॥ २०

९६८ पुंस्कोकिलालापमनोज्ञगीतैर्द्विरेफनादश्रुतिभिः समेतैः ।
आस्थानरङ्गेष्विव गायकाग्र्यो रघूद्वहस्याविरभूद् वसन्तः ॥

९६९ तदीयसेवासमयं प्रदातुमिच्छन्निवासौ रविवंशदीपः ।
सीतासमेतः सरसाग्रगण्य उद्यानवापीतटमन्वगच्छत् ॥

९७० इतस्ततश्चापि विहारलोलस्तया च सापत्रपया समेतः ।
नवीनवध्वा निजदेहलीनसर्वाङ्गयाऽसौ शनकैश्चचार ॥

९७१ तदा समस्ता वनदेवतास्ता वसन्तलक्ष्मीवनितासहायाः ।
वसन्त एवात्र रतीसमेतः कामोऽथवा स्यादिति मेनिरे तम् ॥

९७२ ततो गृहीत्वा वनपालबाला बहुप्रकारं फलपुष्पजातम् ।
द्रुतं समागत्य पुरो निधाय ववन्दिरे राममुपात्तरामम् ॥

९७३ ततस्तु तान् दूरतरं निरस्य करे गृहीत्वात्मनि गूहमानाम् ।
इमां नवोढां स विनोदयिष्यन् रामो रसप्रोतमुवाच वाचम् ॥

९७४ रागोल्लसत्किंशुककोरकास्ते कथं च सन्तीह वदेति पृष्टे ।
रामेण वाला निजमुत्तरीयमस्त्रस्तमप्याचकृषे कृशाङ्गी ॥

९७५ रसालगं पल्लवमाविभाति पुंस्कोकिलास्यक्षतपार्श्वभागम् ।
इतीरिते तेन विमुद्रणं सा चकार हस्तेन निजाधरस्य ॥

९७६ वापीपयः स्वच्छतरं विभाति सीतेऽतिशीतं हृदयं यथा ते ।
किं चात्र निर्गत्य विभात एतौ कुचौ यथा तत्र पयोजकोशौ ॥

९७७ जले निलीनाः खलु देवि मीनास्त्वन्नेत्रसौन्दर्यविलोकनाय ।
उपर्युपायान्ति पुनः पुनश्च विडम्बयन्तीव तवाक्षिलौल्यम् ॥ ३०

१७९ कारण्डवा भान्ति कलं ध्वनन्तस्ते मण्डलाकारतयोपकूलम् ।
आरान् नितम्बस्य स किंकिणीका कटिप्रदेशे तव मेखलेव ॥३१

१८० द्वयोः समानं तु परैर्भृतत्वं त्वं स्वर्णवर्णाऽहमपीन्द्रनीलः ।
मणिर्भवामीति किमेष वारं वारं पिकः कूजति गर्वहेतोः ॥

१८१ कुन्दप्रसूताः सितकोरकास्ते त्वद्दन्तपङ्क्तिं तु विडम्बयन्तु ।
तथापि तेषां क्व नु भाग्यमेतत् ताम्बूलरागारुणिमाभिमानः ॥

१८२ इन्दीवराणां तव लोचनाभ्यां सादृश्यमेषां कवयो वदन्ति ।
कथं नु सोपाधिकचञ्चलानां स्वभावचाञ्चल्यमनोहराभ्याम् ॥

१८३ भृङ्गाङ्गना भृङ्गमिहानुयाति कोकाङ्गना पश्य तथैव कोकम् ।
वसन्तकालस्य चरित्रमेतदावां यथात्यन्तधृतानुरागौ ॥

१८४ रसालभूजस्य रसालसोऽसौ रसातले तत्र रसातलोत्थाम् ।
इतीरयन्नङ्कतले निवेश्य तां चन्द्रकान्तोपरि संविवेश ॥

१८५ करप्रचेयान्यथ तत्प्रदेशे समालतीनामपि मल्लिकानाम् ।
बबन्ध पुष्पाणि कचेषु तस्या विशालवेणीं विरचय्य रामः ॥

१८६ मरन्दमिश्रीकृतधातुरागमिलन्नखाग्रोचितलेखिनीभिः ।
लिलेख पत्राणि सगण्डयोश्च स्तनद्वयप्रान्ततटेषु तस्याः ॥

१८७ ततः करे दर्पणमादधाना विनीलमेघाङ्कतडिन्निभा सा ।
स्वप्राणनाथेन निजस्वरूपे सौन्दर्यसंपत्सखितां ददर्श ॥

१८८ पुनश्च भृङ्गावलिसंविगूढं निजं शिरः सा मुकुरे निरीक्ष्य ।
वने द्वितीया प्रमदाऽत्र काचिन् न्यगोपि तेनेति भृशं शशङ्के ॥

१८९ तस्या अभिप्रायमसौ विदित्वा कराग्रजाग्रच्चलपल्लवेन ।
निवारयामास तदैव भृङ्गान् विज्ञाय तद्भावमियं ललज्जे ॥ ४१

९९० आदर्शमध्ये स्वमुखं तदीयं मुखं च मुग्धा युगपन् निरीक्ष्य ।
जिह्रीय मन्दस्मितमादधाना हसन्नसौ तद्वदनं चुचुम्ब ॥ ४२

९९१ हठात् समुत्थाय तदङ्कदेशाद् गृहाभिमुख्येन चकर्ष बाला ।
सोऽप्युत्तरीयं पुनराचकर्ष नेत्रोत्सवोऽभूद् वनदेवतानाम् ॥

९९२ पुनस्तदङ्के विनिविश्य बाला विलूय पुष्पाणि बबन्ध मालाम् ।
रामस्य कण्ठे ददतुः फलानि चास्वाद्य चास्वाद्य परस्परं तौ ॥

९९३ विहारमेतादृशमारचय्य परस्परं च प्रकटानुरागौ ।
गृहाभिमुख्येन समागतौ तौ वनप्रतीहारमनुप्रपन्नौ ॥

९९४ ततस्तु दास्यः शतशोऽभियाताः
सीतां वहन्त्यः शिबिकाधिरूढाम् ।
सुवर्णवेत्रा अपि सौविदल्लाः
पुरश्च पश्चात् परितोऽभिवव्रुः ॥

९९५ ततोऽतिवेगेन नृपाङ्गनानामन्तःपुरद्वारमवाप देवी ।
ततोऽवतीर्याथ सुखासनात् सा हंसीव पादक्रमणं वितेने ॥

९९६ अभ्यागतां तां विनिवेश्य सीतां सिंहासने राजमहोपचारैः ।
उपाचरन् सर्वसखीसमूहा अत्यादरव्याकुलहस्तपादाः ॥

९९७ उद्याने रामचन्द्रो विहरणमभितः सीतया संविधाय
प्रापय्यान्तःपुरं तां वनपजनसुतान् कङ्कणाद्यैर्विभूष्य ।
षट्पञ्चाशन्महीन्द्रप्रवरसुतसमाक्रान्तपार्श्वं तुरङ्गं
वल्गत्पादं कवीनां जयजयवचनैः सार्धमारुह्य यातः ॥ ४९

९.९८ गतस्तत्र सिंहासनारूढतातं
वबन्दे निजभ्रातृवर्गेण युक्तः ।
वसन्तस्य शोभां स सेनानिवेशे
प्रपश्यन् द्विजैर्मन्त्रिभिर्मोदते स्म ॥ ९०

ओर्गण्टिवंशवर्धनलक्ष्मणयज्वप्रणीतकृतिवर्ये ।
सीतारामविहारे दशमः सर्गोऽगमन्महाकाव्ये ॥१०॥

इति श्रीओर्गण्टिशंकरसोमयाजिसुतलक्ष्मणसोमयाजिकृतौ

सीतारामविहारे महाकाव्ये सीतारामोद्यानविहारः नाम

दशमः सर्गः ॥

—–:०:—–

एकादशः सर्गः

पुष्पावचयादिकम्

५९९ ततस्तु तत्सैन्यनिवासिनीनां विलासिनीनां मदलालसानाम् ।
वसन्तसामन्तनियोजनेन मनोजपूजाकरणे मनोऽभूत् ॥ १

६०० राकामहापर्वणि पूजनाय महोपचारैः स्मरदैवतस्य ।
आदौ प्रसूनावचयाय सज्जाः कान्ता वनान्तं प्रययुः सकान्ताः ॥

६०१ इतस्ततो मन्दगतैर्मनोहराः झगज्झगन्नूपुरमञ्जुशिञ्जिताः ।
वनप्रदेशे वनजायतेक्षणा विरेजिरे ता वनदेवता इव ॥

६०२ ततस्तु हेमप्रतिमासमा इमा विगूढभावाश्चपला अचञ्चलाः ।
परस्परं भाषणमावितेनिरे कलस्वनाः कामुकदत्तकौतुकाः ॥

६०३ कयापि काचिज् जगदे वराङ्गना शुभे निकुञ्जेऽत्र सनाथया मया ।
प्रसूनजातं परिलूयते कृतस्तवाञ्जलिर्याहि पुरो मम स्वसः ॥

६०४ काचित् स्वकान्तेन कृतोपभोगां भूरिप्रसूनामवदत् तवालि ।
एकत्र कुञ्जेऽभवदिष्टसिद्धिर्भवेददृष्टस्य नियामकः कः ॥

६०५ परा निरष्ठीव्यदरालकुन्तला पुरस्थभूजे वदनस्थवारुणीम् ।
ततोऽल्पयत्नात् कुसुमान्यवाप सा सुवंशजातः सुखमाप्नुयाज् जनः॥

६०६ कयापि गूढेङ्गितयेति भाषितं प्रयान्ति ये यान्तु पुरस्तथैव ते ।
सरोजवाताहृतबिन्दुशीतले निविश्यतां मानद वेतसीतले ॥ ८

६०७ छायामुपाश्रित्य तरोः स्थितान्या यदृच्छयाक्रामदिमं पदेन ।
स पुष्पवानास विनापि यत्नं कार्यं भवेत् कारणसन्निधाने ॥ ९

६०८ कयाचिदुत्तुङ्गपयोधराभ्यामालिङ्गितो गाढतरं निपीड्य ।
अपुष्पदापादशिखं महीजः प्रियो यथाञ्चत्पुलकोद्गमाङ्गः ॥

६०९ वृत्तोरुवक्षोरुहभारनम्रा प्रम्लाननीलोत्पललोचनान्ताः ।
नितम्बभारेण नितान्तखिन्नपदक्रमास्ताः प्रययुर्वनान्तात् ॥

६१० श्रमात् परिस्विन्नकपोलदर्पणाः शनैर्विनिर्यद्दूरकीरभाषणाः ।
उरोविपर्यस्तवरार्हभूषणास्तदालपनिद्राभ्रमदायिवीक्षणाः ॥

६११ सुवृत्ततुङ्गस्तनकुम्भमण्डलच्युतोत्तरीयोद्धरणेऽलसालसाः ।
महार्हमुक्ताफलतल्लजान्तरप्रवालमालाद्युतिक्लृप्तकञ्चुकाः ॥

६१२ ललाटपालीलुलितालकानना दुकूलकाषाद् दलितानुलेपनाः ।
गभीरनाभीश्लथनीविबन्धनाः प्रियोपभुक्ता इव रेजिरेऽङ्गनाः ॥

६१३ प्रतिक्षणं भाविमनोभवोत्सवक्रियानुकूलासु कथासु लालसाः ।
प्रसूनकाञ्चीगुणगुच्छसंश्रितद्विरेफनादाकलनोत्सुकाः स्त्रियः ॥

६१४ आश्वासयञ् जलकणैरमलारविन्द–
भास्वत्परागपटवासभरान् वितन्वन् ।
उद्यानचन्दनमहीरुहगन्धवाहो
गङ्गानदीप्रहितदूत इवाभिपेदे ॥

६१५ पद्माननां मीनविशालनेत्रां चक्रस्तनीं सैकतसन्नितम्बाम् ।
मध्ये महावर्तगभीरनाभीं शैवाललेखातनुरोमराजीम् ॥

६१६ प्रतीरधात्रीधरतुङ्गशृङ्गप्रभूतधातुप्रतिबिम्बदम्भात् ।
आविष्कृतान्तर्हृदयानुरागामभ्यागतासूत्पललोचनासु ॥ १८

६१७ कल्लोलचञ्चत्कलहंसनादैः प्रतीरवल्लीभुजचालनैश्च ।
आकारयन्तीमिव योषितस्ता भागीरथीं तां ददृशुः पुरस्तात् ॥१९

६१८ विलासिनीनां गमनं निरीक्ष्य निशम्य मञ्जीररुतं च हंसाः ।
ताभ्यां स्वसादृश्यपरीक्षणेन स्यामापहास्या इति नु व्यपेयुः ॥

६१९ तस्याः समीपमुपसद्य ततस्तरुण्यः
तीरे निधाय कुसुमाभरणांशुकानि ।
सद्यः श्रमापनयनाय धृतोत्तरीया
नीरेऽवतेरुरवलम्बितकान्तहस्ताः ॥

६२० परस्परस्योपरि वारिपूरप्रक्षेपणैरुत्पलताडनैश्च ।
विहंगमोच्चाटनकारिहस्ततालप्रहारैरपि रेमिरे ताः ॥

६२१ अन्यादृशाम्भोरुहसौरभाढ्ये मुखे द्विरेफायितकृष्णतारे ।
पद्मभ्रमेणैव परिभ्रमन्तं काचिच् चकम्पे भ्रमरं निरीक्ष्य ॥

६२२ अन्या विलीना नलिनीवनान्तर्मिलिन्दलीलालकवृन्दजुष्टे ।
मुखेऽरविन्दभ्रममावहन्ती सखीजनं मोहयति स्म मुग्धम् ॥

६२३ परा सखीभिर्वृतसर्वपार्श्वा चलद्घनापीनपयोधराग्रा ।
धीरा कराभ्यामभिहन्यमानवीचीमृदङ्गध्वनिभिर्ननर्त ॥

६२४ इत्थं जलक्रीडनमारचय्य धृतस्ववस्त्राभरणप्रसूनाः ।
अदूरगं प्रापुरतीव हृष्टाः सुवर्णकेतुं शिबिरं तरुण्यः ॥

६२५ ततस्तु नानाविधभक्ष्यभोज्यलेह्यादिभिस्तृप्तिमिताः स्वकान्तैः ।
अस्तं रविं चाददृशुर्मुहुस्ताः सोऽपि प्रियायास्तमियाय तासाम् ॥

६२६ सूनचन्दनविभूषणवस्त्रैः शोभिता युवतयोऽर्कमपश्यन् ।
सोऽपि तत्कुतुकमाशु विदित्वा सन्ध्यया सह समागममाप ॥२८

६२७ सानुरागवृतया रविरस्ते सन्ध्यया धृतकरो नववध्वा ।
कुङ्कुमाक्तसलिलैरभिषिक्तो मज्जनाय जलधौ चलतीव ॥ २९

६२८ किरणमालिनि वारुणदिग्वधूकृतसमागमनोत्सवसंभृते ।
अभवदस्तमदालिकलस्वना कमलिनी मलिनीभवदानना ॥

६२९ उदयति हिमधाम्नि हेमगौरे दिवसकरेऽपि तदैव याति चास्तम् ।
अधितनुवरगैरिकानुलिप्तावभिवसतोऽनुयुयुत्सयैव मल्लौ ॥

६३० परस्परकरस्पर्शाद् बलाबलपरीक्षकौ ।
रवीन्दुमल्लौ रेजाते रागोन्नीतरुषावुभौ ॥

६३१ रविः प्राद्रवदुच्छ्रायं विमृश्य रजनीपतेः ।
परे बलाधिके युक्तं धीरस्यापि पलायनम् ॥

६३२ चण्डभानुरपि कालनियोगात् केवलं किल कलङ्कधरेण ।
मल्लयुद्धविजितः परितोऽसौ रक्तरूषिततनुर्निपपात ॥

६३३ प्रद्योतनेऽस्ताभिगते समन्ताल् लोकेषु किंचित् तम आविवेश ।
आसन् स्वनीडाभिमुखानुधावद्द्विजाकुलग्रामसमीपचैत्याः ॥

६३४ ततस्तमः सर्वदिशान्तरस्थं नुनोद चन्द्रः स्वकरावलीभिः ।
यथैव गङ्गासलिलाभिमर्शी त्रिलोकलोकाश्रितपातकौघम् ॥

६३५ योषितामहिमधाम्नि गतेऽस्तं भाव्यनङ्गसवनश्रमशान्त्यै ।
वीजनाय विदधौ किमु हस्ते यामिनी तुहिनधामजलार्द्रम् ॥

६३६ लोके कलाङ्केन समागतानां स्त्रीणां कलाप्रस्फुरणं मृषैव ।
सद्यः कलानाथसमागमेन यत् पद्मिनी निष्कलतामवाप ॥

६३७ राजा दोषाकरः ख्यातो दोषाणामाकरो हि सः ।
पद्मिनीश्चक्रकान्ताश्च बाधते स्वोदये यतः ॥ ३९

६३८ मधुप्रधानः स्मरचक्रवर्ती मिलिन्दमालागुणसूनचापम् ।
जग्राह जैत्रं विजयी जयाय विजृम्भमाणो भुवनत्रयस्य ॥ ४०

६३९ नितम्बिनीतुङ्गपयोधराद्रिदुरन्तदुर्गेषु निजाहितानाम् ।
धीराग्रणीनामपि चित्तवृत्तिबन्दीः स्त्रियः पातयति स्म कामः ॥

६४० केषांचिदङ्गानि मृगाङ्करश्मिप्रहारतो जर्जरितान्तराणि ।
चक्रे परेषामसितोत्पलाक्षीकटाक्षभल्लैर्दलितान्यनङ्गः ॥

६४१ इत्थं महामन्मथचक्रवर्ती रथे स्थितो दक्षिणगन्धवाहे ।
विजित्य भूमण्डलमिद्धतेजाः शनैः शनैस्तच्छिबिरं प्रपेदे ॥

६४२ मन्मथोऽपि च यदाविरभूत्तास्तत्क्षणेन मधुना मधुपर्कम् ।
स्वस्वकान्तसहिता ददुरस्मै संमदेन परिघूर्णितनेत्राः ॥

६४३ ततस्तरुण्यः सहिताः स्वकान्तैरनङ्गदेवं स्नपयाम्बभूवुः ।
स्वेदोदकैश्चन्दनपुष्पधूपैराराधयंस्ता अधरामृतौघैः ॥

६४४ ईषच्चञ्चलतुङ्गपीवरकुचोत्सङ्गप्रदेशानटन् –
मुक्ताहारमुपर्युपर्युरुतरं चोड्डीय चोड्डीय च ।
व्यावल्गत्कटिभारमूर्ध्वमभितः पश्चाल्ललद्वेणिकं
नाट्यं चापि चकार काचन ततः प्रोद्भिन्नरोमोद्गमा ॥

६४५ तास्तदा मदनदेवतुष्टये जागरं निजगृहे वितेनिरे ।
आप्रभातमसकृन्निवेदितैर्वीटिकाधरसुधामधूदकैः ॥

६४६ काचनाभिनयमाततान गोर्हस्तिनीवदपि कापि हस्तिनी ।
चित्रमातनुत कापि चित्रिणी कापि मत्स्यपुटमाचरन् मुहुः ॥४८

६४७　पद्मिनी पदयुगं तदोर्ध्वगं शङ्खिनी विनतजान्वधोमुखम् ।
एवमाद्यभिनयं वितेनिरे कोकशास्त्रविदितं स्मरोत्सवे ॥ ४९

६४८　इत्थं सर्वा मन्मथपूजां विरचय्य
त्यक्ताशेषाः पञ्चशरानुग्रहतस्ताः ।
स्वैः स्वैः कान्तैरैक्यमवाप्ताः सहमुक्ति[1]
ब्रह्मानन्दादधिकमवापुः परितोषम्[2] ॥

६४९　किंकरीमिव कृतोचितदास्यां यामिनीं समयतः प्रतियान्तीम् ।
व्यब्रुवन् युवतयः कृतकार्यैः कः स्मरत्युपकृतिं परिणामे ॥

६५०　उदयाभिमुखे च तिग्मदीप्तौ स कलङ्की किल पाण्डुरास चन्द्रः ।
प्रतिपक्षजनस्य चेत् प्रकर्षः प्रभवेत् कस्य जनस्य वा प्रहर्षः ॥

६५१　उदयस्य गिरेरधित्यकायामुदयं याति सहस्ररश्मिमल्ले ।
कृतपूर्वपराभवापराधस्मरणेनेव　तिरोदधे　मृगाङ्कः ॥

६५२　पूर्वं रविश्चन्द्रकरावधूतस्तमम्बुधौ पातयति स्म पादैः ।
सर्वोऽपि लब्धावसरो हि लोके स्ववैरनिर्यातनमातनोति ॥

६५३　पद्मिनीसखमपातयदिन्दुर्लोकबन्धुमपि कालसहायः ।
सोऽपि तद्वदपतत् परिणामे संचितस्य फलमेति हि लोकः ॥

६५४　रविणा पुनरेत्य पद्मिनी मुकुलीभूतमुखी शनैरुषः ।
परिसार्य करं प्रसादिता दयितेनेव शठेन खण्डिता ॥

६५५　[3]नटभटगायकमर्दलवादनलोला उषस्युपागत्य ।
श्रीरामचन्द्रबोधनमातेनुरुदारभाषितविलासैः ॥ ५७

1. कैवल्यम् इति पाठान्तरम्.　2. अथानन्दम् इति पाठान्तरम्.
3. नटकविगायकमर्दल इति पाठान्तरम्.

६५६ श्रीरामोज्ज्वलकीर्ते ननु ते कीर्तिप्रतापपुष्पवतोः ।
जयतोः क्षोणीपतयो जाता नक्षत्रमण्डलाधीशाः ॥ ४८

६५७ रघुवर मन्मथमूर्ते विसरति ते कीर्तिमण्डले लोके ।
आश्लिष्य शम्भुमास्ते नित्यं नगकन्यका तिरोधिभिया ॥

६५८ रविकुलकैरवबन्धो तावककीर्तिः प्रतापतः पश्चात् ।
धावति किमिति न जाने सोदर्याद् वा विवादतो वेगे ॥

६५९ रघुवीर दीनबन्धो भावत्कमहाप्रतापमित्रोऽसौ ।
तोषयति मित्रमेतद् युक्तं चित्रं तमेव तापयति ॥

६६० राघव करुणासिन्धो भवतः कीर्तिर्महीयसी जगतः ।
तत्र तु माति कथंचिद् दर्पणमध्ये गिरिर्यथा वसति ॥

६६१ इन्द्रविरिञ्चिप्रमुखा द्वारि समागत्य दर्शनापेक्षाम् ।
कुर्वन्ति राम शोभनमाधत्स्व विबुध्य सर्वलोकानाम् ॥

६६२ अरुणोदयोऽपि समजनि तरणिकुलावन तरणिः पुरो भाति ।
अरुणाधर चन्द्रोऽसौ नक्षत्राणां सरणिं जहातितराम् ॥

६६३ अङ्ग कुरङ्गीनेत्रा मङ्गलदीपावलीः करे धृत्वा ।
शृङ्गाररसविजृम्भितसङ्गीतमिह प्रकुर्वते प्रातः ॥

६६४ अङ्गीकरोति भृङ्गीसङ्गं चाम्भोजमङ्ग सविकासम् ।
सङ्गं तवाङ्गरागोऽप्यङ्गेन कृतं विशिष्य विजहाति ॥

६६५ तत्रैवं कविबन्दिमागधजनैः संस्तूयमानस्तदा
स प्राबुध्यत सूर्यवंशतिलकः स्वर्गे महेन्द्रो यथा ।
प्रातःकालमहोत्सवाकुलजनादन्तःपुरान्तर्गतः
तत्कालोचितनित्यकर्म निखिलं कृत्वा सभायां स्थितः ॥ ५७

ओर्गण्टिवंशवर्धनलक्ष्मणयज्वप्रणीतकृतिवर्ये ।
सीतारामविहारकाव्ये त्वेकादशः सर्गो महाकाव्ये ॥११॥

इति श्रीओर्गण्टिशंकरसोमयाजिसुतलक्ष्मणसोमयाजिकृतौ

सीतारामविहारे महाकाव्ये पुष्पावचयादिकं नाम

एकादशः सर्गः

—:0:—

द्वादश: सर्ग:

यौवराज्याभिषेक:

६६६ स वासरांस्तत्र विनीय कांश्चिदाहूय मन्त्रिप्रवर सुमन्त्रम् ।
पुरप्रवेशाय वरूथिनीं तामाज्ञापयामास रघुप्रवीर: ॥ १

६६७ तत: सुमन्त्रो निजभृत्यवर्गान् संप्रेष्य सेनाविनिवेशमध्ये ।
आनाययामास तत: क्षणेन रथाश्वमातङ्गभटादिसेनाम् ॥

६६८ यस्य प्रभोर्निष्क्रमणेऽथ भेरीझाङ्कारहेषारवबृंहितादीन् ।
कोलाहलान् व्याप्तदिगन्तरालाञ् श्रुत्वा सुरेश: सुतरां तुतोष ॥

६६९ तत: समारुह्य रथांस्तुरङ्गान् गजान् महाराजकुमारवीरा: ।
प्रतस्थिरे मन्त्रिवरै: समेता: शुद्धान्तमावृत्य नृपश्च पश्चात् ॥

६७० यस्य प्रयाणे निजसैन्यनुन्नरज:प्रतानेन रवौ निरुद्धे ।
भेरीनिनादेऽपि च नीलकण्ठा: केकारवांश्चक्रुरुदारनृत्ता: ॥

६७१ व्यामामेयपयोधरामितभरादीषन्नमन्मध्यमा:
प्रस्विन्नामललोलकुण्डलमणिप्रोद्भासिगण्डस्थला: ।
वेगादुल्ललितालकाकुलदृश: स्त्रस्तोत्तरीयाम्बरा
जग्मुर्जानपदाङ्गना: प्रतिपथं सीतापतिं वीक्षितुम् ॥

६७२ तत्र मार्गे कदाचित् स भूनायक:
स्वस्य चित्तस्य विक्षोभसम्पादिकाम् ।
दुर्निमित्तावलिं वीक्ष्य भीतिं गतो
भाषते स्मादरात् तं वसिष्ठं मुनिम् ॥ ७

६७३ आराद् घोराराव: काको वामं यात: किं भाव्यग्रे ।
वामं नेत्रं कम्पं याति प्रस्वेदोऽपि प्रायो भाति ।। ८

६७४ वामस्येयं बाहो: स्फूर्ति: किं चानिष्टं वक्तीवाग्रे ।
धूलिर्दिक्षु व्याप्तात्यन्तं किं वा चित्तं मेऽद्यास्वस्थम् ।।

६७५ वाचि विचारं रचयति तस्मिन् राजमुखोत्थाक्षरमिलितायाम् ।
सन्मुनिवर्ये शकुनसमूह: कश्चिदभूत्तत्पथि सुखशंसी ।।

६७६ मार्गे चास्मिन् बहुमृगयूथो वामाद् धावन् व्रजति हि पश्य ।
राजन् किंचिद् भयमिह नास्ति स्वस्थो भूया इति स बभाषे ।।

६७७ इत्युच्यमाने समुपागत: स्वयं
चापं गृहीत्वा जमदग्निनन्दन: ।
बाणं च हस्ताङ्गुलिभि: प्रचालयन्
व्योम्नो यथा गर्जितमन्तराशनि: ।।

६७८ तं वीक्ष्य राजा प्रसभं प्रकम्पित: पाद्यं गृहीत्वार्घ्यमपि प्रधावनात् ।
स्वामिन् गृहाणेदमितीरयन् वचस्तस्यावतस्थे स पुरो विनीतवत् ।।

६७९ इति तद्वचनं परिधूय मुनिर्ज्वलनोपमनेत्रयुगं भ्रमयन् ।
तृणवद् गणयन्नपि तं नृपतिं वदति स्म तदा खमपि ध्वनयन् ।।

६८० किमये नृपते वदसीदमिह प्रथितं ननु मे चरितं जगति ।
विदितं खलु तेऽपि कठोर इति क्षितिपालकुलान्तक इत्यपि च ।।

६८१ यदा क्षत्रियाणां वधायाहमाजौ
समायातवांस्तत्क्षणे स्वर्गलोकम् ।
महेन्द्रस्य साहाय्यदम्भेन यातो
मृधे राक्षसानां स्थितोऽसीह जीवन् ।। १६

६८२ इदानीं प्रवृद्धः स्वतो यास्यसीतः परं त्वं परं लोकमित्येव मत्वा।
त्वदीये शरीरे कुठारस्य पातं न कुर्यां व्रजाम्यद्य यत्रास्ति रामः॥१७

६८३ अये दीनबन्धो दयापूर्णसिन्धो ममानेकवर्षैरुदीतो हि बालः।
इतीमां स नेमां वदत्येव वाचं नृपे तं तृणीकृत्य यातोऽनुरामम्॥

६८४ स तत्रापि गत्वावदद् रे कुमार त्वया किं कृतं शैवचापं विभज्य।
अनेकैर्दिनैर्जीर्णमेतद् विसृष्टं सुमेरुं धनुः कुर्वता शङ्करेण॥

६८५ धनुरेतदेष समुपानयत् पुरः
शृणु राम वत्स बलमस्ति चेत् तव।
कुरु नम्रमत्र पुरतो ममाधुना
सगुणं कुरुष्व सगुणो भविष्यसि॥

६८६ सुप्तो यथाहिश्चरणाभिघाततः
सिंहो यथा बृंहितनादतो भवेत्।
व्याघ्रो यथा क्षुद्रमृगेण धावितः
सोऽहं तवैतच्चरितेन कोपितः॥

६८७ एवं तेनात्यन्तगर्वप्रयुक्तां वाचं श्रुत्वा मन्दहासोऽवदत् सः।
चापं तावन् मामके देहि हस्ते व्यर्थाः किं वा भाषसे विप्र वार्ताः॥

६८८ इत्युक्त्वा तत्पाणितः कार्मुकं तज्
जग्राहासौ राघवो निर्विशङ्कम्।
आरोप्यादौ बाणयुक्तं चकार
स्वात्मन्येतत् तेजसा चाचकर्ष॥

६८९ तदा भार्गवो व्यर्थवार्ता रटित्वा
करे तद् धनुस्तस्य दत्त्वा वितेजाः।
अभून् निष्ठुरं नाब्रवीद् राघवोऽसौ
क्रिया केवलं तूत्तरं हि प्रसिद्धम्॥ २४

६९० बाणोऽयं त्वच्चापनियुक्तः परिकृष्टो
व्यर्थो न स्याद् राघवबाहुप्रहितोऽयम् ।
ब्रूहि ब्रह्मंल् लक्ष्यमिदं ते पदयुग्मं
स्वर्गो वा स्यादित्यवदत् तं रघुवीरः ॥ २९

६९१ निस्तेजस्कस्ततोऽसौ रघुवरमुखमालोक्य पाण्डुत्वयुक्तो
व्यादायास्यं स्वदन्तानतिधवलतरांस्तत्समाजे प्रदर्श्य ।
स्वामिंस्ते नैव जाने कमठनरतनुं मे दुरुक्तं क्षमस्वे-
त्येवं बद्धाञ्जलिः सन्नतिविनययुतो भाषितं व्याजहार ॥

६९२ स्वामिन्नेतच्चरणयुगं मे भूयो
भूयो रक्ष्यं तव करुणातस्तीर्थे ।
तीर्थे गत्वा बहुतरपुण्यं यायां
या यामुष्मिन् गतिरिह तां तां हन्याः ॥

६९३ तामथ साधुवाचमखिलां द्विजवरगदितां
स प्रभुशेखरस्य तनयश्रुतिपथमनयत् ।
तं शरशेखरं तु कृतवानुपरिविगलितं
महिजशेखरोऽपि गतवान् यमदिशि तपसे ॥

६९४ तस्मिन् गते दशरथः पुनरेव जातं
श्रीराममात्मतनयं बहुधैव मेने ।
आघ्राय मूर्ध्नि सहसा स्वयमाश्लिषत् तं
स्वस्थः स्वकीयनगरं प्रति संप्रतस्थे ॥

६९५ ग्रामाद् ग्रामान्तरं गच्छन् ग्रामीणान् परिपालयन् ।
वासन्तीं सम्पदं पश्यन्नयोध्यामगमत् प्रभुः ॥ ३०

६९६ अब्धीनुत्तटयन् वियद् विदलयन्नुच्चाटयन् स्वर्धुनी-
हंसानुच्चलयन् सुरेन्द्रनगरीं धात्रीधरान् कम्पयन् ।
स्वीयानुन्नमयञ् शिरांसि नमयन् भूयः प्रतिस्पर्धिनाम्
सेनानां निनदैः स्वकीयनगरं श्रीरामचन्द्रोऽविशत् ॥ ३१

६९७ रम्भास्तम्भसमीपपूर्णकलशैरुद्भासितद्वारदिग्-
वेदीमध्यनिषण्णविप्रनिगमोद्घोषाभिरामालयाम् ।
रथ्याशोधनगन्धसेककुसुमप्रक्षेपणाष्टापद-
प्रोद्यत्केतुनिबन्धनापणगणालंकारलोकोत्तराम् ॥

६९८ एवं महाराजमहोपचारैरालोलल्लोकां निजराजधानीम् ।
सद्बन्दिवादित्रमृदङ्गगीतनाट्यैः समं प्राविशदेष रामः ॥

६९९ यस्य प्रवेशे नगराङ्गनानां सुधागृहालीशिखरस्थितानाम् ।
मुखानि मन्दस्मितमञ्जुलानि दिवापि पूर्णेन्दुधियं दिशन्ति ॥

७०० कासांचिदासन् वदनानि सौधवातायनान्तर्विनिवेशितानि ।
पद्मानि शोभापरिकल्पितानि नेत्रद्विरेफैरनुरञ्जितानि ॥

७०१ तदाभवत् पौरविलासिनीनां समीपवातायनसंश्रितानाम् ।
परस्परं संमुखमास्थितानां संलाप उल्लासकरो जनानाम् ॥

७०२ अयं ससीतः सखि पश्य लक्ष्मीसमेतनारायणवद् विभाति ।
शिवेन युक्ता गिरिजेव सापि ज्योत्स्नायुतश्चन्द्र इवैष रामः ॥

७०३ विनीलमेघाङ्कतडिल्लतेव सीता सुवर्णप्रतिमासमाना ।
रघूद्वहोत्सङ्गगता विभाति सखि प्रपश्यास्य पुरस्य भाग्यम् ॥

७०४ यस्यान्ते निवसन् स्वयं फणिपतिर्वाक्चातुरीधुर्यतां
प्राप्तो राघवसिन्धुवर्धनविभोः श्रीरामचन्द्रप्रभोः ।
पातालादिसमस्तलोकनिचये दत्ताधिकारोऽप्यभूत्
किं न्यूनं महदाश्रये सति भवेल् लोकस्य लोकत्रये ॥ ३९

७०५ इतीर्यमाणानि च भाषणानि पुराङ्गनासुन्दरवक्त्रचन्द्रैः ।
श्रीरामचन्द्रोऽपि जहर्ष तानि शृण्वंस्तदाभाषणदत्तचित्तः ॥ ४०

७०६ तदा स कान्ताञ्जलिलाजजालैर्नेत्रोत्पलाच्छद्युतिभिश्च कीर्णः ।
शृण्वन् कथास्तन्मुखतः स्वचित्रवृत्तश्रिता गेहसमीपमागात् ॥

७०७ मृदङ्गपटहध्वनिप्रकटितामरेन्द्रोदयः
समानधरणीधरैर्गुरुसमानगोत्रामरैः ।
जितारिरभिवर्धितो जयजयोक्तिभिर्बन्दिनाम्
गजाश्वरथपत्तिभिः सदनदेहलीं प्राप सः ॥

७०८ तत्रावतीर्णा निजवाहनेभ्यस्तडित्प्रभस्वस्ववधूसमेताः ।
अन्तःपुरान्तर्निजमातृवर्गमनुक्रमेणैव ववन्दिरे ते ॥

७०९ कौसल्याथ सुमित्राऽपि कैकेयी च निजस्नुषाः ।
आश्लिष्याश्लिष्य चाशीर्भिस्तनयानप्यवर्धयन् ॥

७१० अन्याश्च मातरः सर्वाः रामस्याश्लिष्य तां वधूम् ।
कल्याणि सीते वर्धस्व पाह्यस्मानिति चाब्रुवन् ॥

७११ समागत्य तदा सर्वे वसिष्ठादिपुरोहिताः ।
पुण्याहवाचनादीनि चक्रुश्चाशीःपरंपराः ॥

७१२ तदा दशरथो विप्रान् वस्त्राभरणदक्षिणाः ।
संपूज्य तेभ्यो दत्त्वा च कृतार्थोऽस्मीत्यमन्यत ॥

७१३ तत्रासौ यौवराज्यं दशरथनृपतिर्ज्येष्ठपुत्राय दत्त्वा
सीतारामाय मन्त्रिद्विजवरधुरि तन्मस्तके न्यस्तभारः ।
पत्नीभिः सेव्यमानः स्वसुतपरिजनैः सर्वदाराध्यमानो
भुञ्जानो भोगवर्गान् सुरपतिरिव स स्वर्गसौख्यं प्रपेदे ॥ ४८

७१४　रघुपतिरधिगत्य यौवराज्यं दशरथराजसुखाय सार्वभौमः ।
स जनकतनयाप्तसर्वकामो जगदवनं विदधज् जगाम वृद्धिम् ॥४९

७१५　ओर्गण्ट्यन्वयसिन्धुबन्धनविधौ नित्यान्नदानव्रत -
ख्यातो लक्ष्मणसोमयाजिविबुधोऽभूद् विश्रुतो भूतले ।
आसीच् छङ्करसोमयाजिसुकृती तस्यात्मजस्तत्सुत–
श्रीमल्लक्ष्मणसोमयाजिकविना काव्यं त्विदं निर्मितम् ॥

७१६　स्वप्ने साक्षात्कृतो यः प्रथममुपदिशद् दक्षिणामूर्तिमत्र
पश्चादाज्ञापयच् च स्वमहिमकलितं पञ्जरं यः पठेति ।
तस्येशस्य प्रसादाद् विमलमतिरयं लक्ष्मणाध्वर्युदारं
सीतारामस्य हारं व्यरचयदतुलं काव्यमेतद् विहारम् ॥५१

ओर्गण्टिवंशवर्धनलक्ष्मणयज्वप्रणीतकृतिवर्ये ।
सीतारामविहारे द्वादशसर्गोऽगमन्महाकाव्ये ॥१२॥

इति श्रीओर्गण्टिशंकरसोमयाजितनूजलक्ष्मणसोमयाजिकृतौ

सीतारामविहारे महाकाव्ये यौवराज्याभिषेको

नाम द्वादशः सर्गः

समाप्तमिदं काव्यम्

—:0:—

परिशिष्टानि

१–वृत्ताविष्करणी

A Note on Metres

In sanskrit verses are regulated by quantity and not by accent as we find in English. A पद्य or stanza consists of four चरणs or पादs i. e. quarters.

The पाद regulated by the number of अक्षरs (i. e. syllables), or मात्राs (i. e. syllabic accents) is called वृत्त or metre. The metre is divided into three classes : (i) समवृत्त (ii) अर्धसमवृत्त (iii) विषमवृत्त. Most of the वृत्तs conform to the first division, as all the four पादs in a समवृत्त class are in one and the same metre. In a stanza of अर्धसमवृत्त the first पाद corresponds with the third पाद and second with the forth, which are respectively the odd and even पादs. The stanzas belonging to the विषमवृत्त are very rare.

The vowels अ इ उ ऋ ऌ are short and the remaining vowels are all long. The quantity of a syllable is determined by its vowel. The syllable is called लघु (light) or गुरु (heavy) according as the vowel is short or long. A syllable, however, becomes गुरु when it is followed by an अनुस्वार or a conjunet consonant or when it happens to be at the end of a पाद.

सानुस्वारश्च दीर्घश्च विसर्गी च गुरुर्भवेत् ।
वर्णः संयोगपूर्वश्च तथा पादान्तगोऽपि वा ।। (छं. मं. 1. 10)

Three successive syllables form a गण or foot. The short syllable is marked as ∪ and a long syllable is marked as — These are eight गणs in all and they are exhibited as follows :—

य ∪ — —	भ — ∪ ∪	ल ∪
र — ∪ —	ज ∪ — ∪	ग —
त — — ∪	स ∪ ∪ —	
न ∪ ∪ ∪	म — — —	

In this small work of 720 verses, the author has used about 36 different metres. They are given below together with their definitions, गणs and यतिs and the illustrations from the text. Short and sweet definitions of the metres are seleeted from जयदामन् edited by Prof. H. D. Velanker.

The special characteristic of this author is that he gives examples of the fourteen varieties of the उपजांति metre. The verses 655—664 are विषमवृत्तs as each quarter differs in गणs. These may be called उपजातिs or श्लोकs, according to Pingala or Hemacandra.

——:o:——

२–वृत्तलक्षणानि सोदाहरणानि

1. अनुष्टुप् (4. 4)–आनुष्टुभि ताज्जलगाः। (जयकी. 2.62)
(त ज ल ग)
(xi) 630. 631. (एतट्टीकाकारेण मल्लोपजातिः इति कथितम्)

2. (अपरवक्त्रम्, प्रबोधिता, सुन्दरी)—अयुजोर्यदि सौ जगौ युजोः सभरा ल्गौ यदि सुन्दरी तदा। (छं. मं. 3. 6)
(ससजग) (स भर लग)
(ii) 112; (iii) 149; (iv) 1-53. 55-57.

3. इन्द्रवज्रा (5. 6)–स्यादिन्द्रवज्रा यदि तौ जगौ गः (छं. म. 2. 41)
(त त ज ग ग)
(i) 3. 13. 14. 24. 29. 30. 40. (ii) 118.
(x) 557. 558; (xi) 618. 625. 636; (xii) 668. 698. 700.

4. इन्द्रवंशा (5. 6)–तौ ज्रौ इन्द्रवंशा। (हे. 2. 158)।
(ततजर)
(xii) 677. 678. 686.

5. उत्सवः, चामरम्, तूणकम् (4.8)–जंजंरास्तूणकम्। (हे. 2. 254)
(रजरजर)
(vi) 315--321.

6. उपजातिः (5. 6)–आद्यन्ता उपजातयः (पिं. 6. 17)।
आद्यन्तौ इन्द्रवज्रोपेन्द्रवज्रयोः पादौ । एषा चतुर्दशप्रकारा।

उ=उपेन्द्रवज्रा
इ=इन्द्रवज्रा

1. आर्द्रा (5. 6)–(उइउउ)
(i) 28. 35. 37; (xii) 667.

2. ऋद्धिः (5. 6)–(उइउउ).
(i) 6. 50; (x) 575, 578; 594; (xi) 608.

3. कीर्तिः (5. 6)–(उइइइ)
(i) 23. 29; (ii) 116; (x) 555. 565; 570; (xii) 706.

4. जाया (5. 6)–(इउउइ)
(i) 5. 12. 46. 47. 49; (x) 561. 562; 590; 596. (with ललज्ज); (xi) 607.

5. प्रेमा (5. 6)–(उउइउ)
(i) 15; (x) 550.

6. बाला (5. 6)–(इइइउ)
(i(7. 10. 11. 19. 26, 45. 58; (x) 554. 564. 567; 577; 579; 587; (xi) 604. 633.

7. बुद्धिः (5. 6)–(इउउइ)
(i) 1. 9. 17; (ii) 113; (x) 556; (xi) 622. 624; (xii) 699.

8. भद्रा (5. 6)–(इउइउ)
(x) 552. 569. 590 (with जिह्राय); (xi) 640. 652; (xii) 708.

9. माया (5. 6)–(उउउइ)
(i) 4. 27; (ii) 117; (x) 553. 560. 571. 572. 574. 584; (xi) 620; (xii) 669. 702.

10. माला (5. 6)–(उउइइ)
(x) 591. 592; (xi) 614. 617. 618. 623. 639. 643.

11. रामा (5. 6)–(इइउउ)
(i) 16. 31. 41. 64; (ix) 546. 582; (xi) 609.

12. वाणी (5. 6)–(इउइइ)
(i) 22. 33. 34. 36. 43. 48. 51; (x) 563. 575; (xii) 670. 705.

13. शाला (5. 6)–(इइउइ)
(i) 20. 21. 32. 38; (x) 581. 583.

14. हंसी (5. 6)–(उइउइ)
(i) 2. 18. 25: (x) 557. 559. 580. 595; (xii) 670, 705.

7. उपेन्द्रवज्रा (5. 6)–जतजा गावुपेन्द्रवज्रा। (हे. 2. 155)
(जतजगग)
(i) 8. 42; (x) 549. 566. 568. 573. 585. 586. 588. 593; (xi) 599. 634. 638; (xii) 700.

8. कुड्मलदन्ती (5. 6) कुड्मलदन्ती भ्तौ न्गौ गिन्द्रियरसाः। (पिं.8.2)
(भतनगग)
(xii) 675.

9. जलधरमाला (4. 8)–म्भौ स्मौ जलधरमाला घैः (हे. 2. 178)
(मभसम) (घ=4)
(xii) 692.

10. छित्तकम्, तोटकम् } (5. 7)–वद तोटकमब्धिसकारयुतम् (छं. मं. 2. 70)
(ससस)
(xii) 679. 680.

11. द्रुतविलम्बितम् (8. 4)–द्रुतविलम्बितमाह नभौ भरौ । (छं.मं.2.74)
(नभभर)
(iii) 148; (vii) 353–419; (xi) 628.

12. नाराचम, पञ्चचामरम् } (3. 8)–जरजरजगाः पञ्चचामरम् । (हे.2. 278)
(जरजरजग)
(v) 290–299; (vi) 301. 302.

13. पुष्पिताग्रा (12+13)–अयुजि नयुगरेफतो यकारो युजि च नजौ जरगाश्च पुष्पिताग्रा (छं. मं. 3. 5)
(ननरय; नजजरग)
(xi) 629; (xii) 714.

14. पृथ्वी(8. 9)–जसौ जसयला वसुग्रहयतिश्च पृथ्वी गुरुः(छं.म.2.164)
(जसजसयल)
(xii) 707.

15. प्रमिताक्षरा (5. 7)–स्जौ सौ प्रमिताक्षरा । (हे. 2. 176) ।
(सजसस)
(iii) 125–147.

16. भुजङ्गप्रयातम् (6. 6)–भुजङ्गप्रयातं चतुर्भिर्यकारैः । (छं.मं.2.69)
(यययय)
(x) 598.

17. मञ्जुभाषिणी(5. 8)–सजसा जगौ च यदि मञ्जुभाषिणी(छं.मं.2.99)
(सजसजग)
(xii) 685.

18. मत्तमयूरम् (4. 9) वेदै रन्ध्रैर्म्तौ यसगा मत्तमयूरम् (छं. मं. 2. 97)
(मतयसग)
(xi) 748; (xii) 690.

19. मत्ता (4. 6)–मभ्नस्गा मत्ता घैः (हे. 2. 207) । मभसग । (घः 4)
(xii) 677.

20. मालभारिणी / वसन्तमाला } (11–12) साज्जगाः, स्भर्या मालभारिणी (हे.3.17)
(ससजगग; सभरय)
(i) 59; (ii) 115; (vi) 54; (v) 283-259; 268-289; (vii) 322-341; (xi) 650. 651.

21. मालिनी (8. 9)–ननमययुतेयं मालिनी भोगिलोकैः (छं.मं.2.134)
(ननमयय)
(v) 260.

22. रथोद्धता (7. 4)–रात् परैर्नरलगै रथोद्धता। (छं. मं. 2. 249)
(रनरलग)
(xi) 645--647.

23. रुक्मवती (4. 6)–भ्मसगा रुक्मती (हे. 2. 113) (भमसग)
(xii) 672.

24. वंशपत्रपतितम् (10. 7)–दिङ्मुनि वंशपत्रपतितं भरनभनलगैः।
(छं. मं. 2. 165)
(भरनभनलग)
(xii) 693.

25. वंशस्थविलम् (5. 7)–वदन्ति वंशस्थविलं जतौ जरौ। (छं.मं.2.66)
(जतजर)
(ix) 472-496; 498-554; (xi) 601-606; 610-613.

26. वसन्ततिलकम् (8. 6)–उक्ता वसन्ततिलका तभजा जगौ गः
(छं. मं. 2. 112)
(तभजजगग)
(ii) 119. 120. 121. 123; (iv) 56; (vi) 342–351; (vii) 420. 421; (viii) 422, 470; (ix) 548; (xi) 614. 619; (xii) 694.

27. विद्युन्माला (4. 4)–मो मो गो गो विद्युन्माला (छं. मं. 2. 45)
(ममगग)
(zii) 673, 674.

28. शालिनी (4. 7)–मात्तौ गौ चेच् छालिनी वेदलोकैः। (छं.मं.2.45)
(मततगग)
(xii) 687. 688.

29. शार्दूलविक्रीडितम् (12. 7)–सूर्याश्वैर्मसजस्तताः सगुरवः शार्दूलविक्रीडितम् (छं. मं. 2. 198)
(मसजसततग)
(iii) 176; (v) 264–267; 300; (vi) 352; (xi) 644. 645; (xii) 671. 696. 697; 704. 715.

30. शिखरिणी (6. 11)–रसै रुद्रैश्छिन्ना यमनसभला गः शिखरिणी।
(छं. मं. 2. 163)
(यमनसभलग)
(v) 261. 262; (vi) 305--314.

31. श्लोक (8)–The fifth letter short, 6th long in all Padas, 7th short in the even ones.
(xi) 637; (xii) 695. 707. 711; 712.

32. स्रग्धरा (7. 7. 7)–म्रभ्नैर्यानां त्रयेण त्रिमुनियतियुता स्रग्धरा कीर्तितेयम् (छं. मं. 2. 212)
(मरभनययय)

(i) 52-57; (v) 263; (ix) 547; (x) 587; (xii) 691. 712. 716.

33. स्वागता (11)–स्वागता रनभगैर्गुरुणा च (छं. मं. 2. 50)

(रनभगग)

(ii) 60–112. 124; (iii) 174; (xi) 627. 632; 635. 642. 649. 653.

34. हरिः (6. 4. 7)–रसयुग् हययुङ नौ म्रौ सो लगौ हि यदा हरिः। (छं. मं. 2. 172)

(ननमरसलग)

(ix) 497.

35. हरिणी (6. 4. 7)–नसमरसलागः षड्वेदैर्हयैर्हरिणी मता (छं. मं. 2. 169)

(नसमरसलग)

(viii) 471.

36. (xi) 655-664. These may be called उपजाति or श्लोक according to Piñgala or Hemacandra.

——:o:——

३—मातृकावर्णानुसारेण सीतारामविहारकाव्यस्थश्लोकसूची

श्लोकारंभः	पृष्ठं	श्लोकसं.	श्लोकारंभः	पृष्ठं	श्लोकसं.
अखण्डभूमण्डल	२	८	अथ बलातिबले	४०	४०१
अङ्गकुरङ्गीनेत्रा	८२	६६३	अथ भाग्यवशादुपगते	२४	२१६
अङ्गपञ्चकमनु	९	७०	अथ मृष्टसान्द्र	१५	१२५
अङ्गीकरोतु	८२	६६४	अथ वचोऽभिदधे	४९	४०३
अत एव स मे	४०	३३३	अथ विश्वपतिं	३९	३२३
अतिथये वितथं	४८	३९७	अथ वैश्यजन्म	१९	१७०
अतिनीलतमाल	२३	१९८	अथ वैश्यमुनि	१९	१७१
अतिपीनमृदा	२४	२११	अथ शारदेऽपि	१७	१५१
अथ कदाचिदमुं	४६	३७९	अथ सुतेष्टिविधान	४४	३५८
अथ कश्चन कंचिद्	३२	२७७	अथ हविर्भुजि	४४	३५४
अथ काचन नाटय	२३	२०१	अथ हीरवरासन	४१	३४०
अथ तत्र विभाण्डक	२३	१९९	अधरोत्तरभागसंवृता	२३	१९७
अथ तन्मनसो	२२	२२३	अधिकाशि परं	३३	२८५
अथ ता मृदुपाद	२२	१८८	अधिकाशि वसत्यसौ	२८	२४७
अथ तां मणि	२८	२५०	अधुनास्ति किला	२१	१७८
अथ तेऽपि च	२२	१८४	अनपत्यजन्म भवति	१८	१६४
अथ दैववशात्	२८	२४२	अनपत्यताभिध	१८	१५५
अथ धृष्ट्यशोक	१८	१५९	अनारतं यत्र बुधैः	५	५०
अथ षंक्तिरथं	२७	२३५	अनाश्रयव्योम	३	२५
अथ पंक्तिरथो	२७	२३३	अनुससार स शैशवे	४६	३७८
अध प्रभाते विमले	६६	५२१	अनेकनेपथ्य	५७	६३५
अथ प्रहृष्टो मिथिला	६१	४७२	अन्यादृशामम्भोरुह	७८	६२१

अन्याविलीन	७८	६२२
अन्याश्च मातरः	८९	७१०
अपि वह्निमुखे	४०	३२७
अब्धीनुत्तारयन्	८८	६९६
अभ्यागतां तां	७४	५९६
अम्ब त्वामनुसंदधे	३०	२६४
अम्बाद्याभिमुखी	३१	२६७
अमरेश सहस्रनेत्र	४०	३२८
अमूल्यकण्ठा	६७	५३०
अयं दुराधर्षपराक्रमो	६३	४९४
अयं विवाहो	६५	५११
अयं ससीतः	८८	७०२
अये दीनबन्धो	८६	६८३
अरुणोदयोऽपि समजनि	८२	६६२
अलमस्य महागुणं	७	५९
अल्पभूतिसुहिमं	९	७८
अवलोकयन् सुविमलं	१७	१५४
अवलोक्य तदा	२५	२१७
अश्वत्थपर्णाय	१३	११८
अष्टदिग्विजयसंभृत	११	१००
अष्टमन्त्रिवर	९	७५
अस्ति प्रशस्ताखिल	१	१
अस्त्यद्भुतात्र नगरी	५२	४२५
अस्माकमीश	४२	३४८
अहमदृष्टसुतानन	४७	३९२
अहं महासाहसिको	१	४
अह विधे मम	४७	३९१
आ		
आकर्ण्य तद्वचनम्	५८	४६२
आत्मनामधामधीम	३९	३१८
आत्मनीनरथ	११	९४
आदर्शमध्ये	७८	५९०
आदर्शमाणिक्य	५	४७
...	२	१०
आबध्दवज्रा	७०	५५२
आमन्त्र्य तं	६९	५४८
आराद् घोराराबः	८५	६७३
आशया मिलितभूरि	११	९६
आश्वासयञ्जल	७७	६१४
इ		
इतः परं भद्रपर	६१	४७४
इतस्ततो मन्द	७६	६०१
इतस्ततश्चापि	७२	५७१
इतरेतरमध्यधायि	२८	२४५
इतिजह्नुसुतां जगत्	३१	२६८
इति तद्वचनं परि	८५	६७९
इति तद्वचनेन मोहितः	२५	२२२
इति तद्वचनैः	२८	२४९
इति तां तुलसीं	३२	२७६
इति तां स्तुतिभिः	२९	२५९
इति तेन बलात्कृताश्च	२४	२१४
इति तैः कथिते	२१	१८३
इति दूतमुखात्	२५	२२६
इति देववरेण	३३	२८७
इति मुखं वचनेन	४७	३८५
इति रावणबाधने	४०	३३४
इति लक्ष्मणसोम	३०	२८९
इति लोकविचित्रभाषं	२५	२१९
इति वचः समुदीर्य	४४	३५७
इति विश्वपतिं प्रणम्य	३९	३२३

इति विश्वपतेः	४१	३३८	इदं शिखण्डिनन्दनेन	३५	२९८
इति शारदीं समवलोक्य	१७	१५०	इ ं स्तोत्रं तोत्रम्	३८	३१४
इति ससूचनम्	४८	३९९	इदानीं प्रवृद्धः	८६	६८२
इति साधु सनत्	२६	२३२	इन्दीवराणां	७३	५८२
इति स्तुतस्तु भैरवः	३५	२९९	इन्द्रगोपरिचित्रित	१२	१०९
इतीरयित्वा नृपतिः	६३	४९५	इन्द्रं वह्नि	९	७४
इतीरयित्वा नृपतिः	६६	५२६	इन्द्रविरिञ्चि	८२	६६१
इतीरितस्तेन स राजा	६६	५२५	इन्द्रसंसदि जगाम	९	७३
इतीरितं तज्जनको	६३	४९१	इमं सर्वं गर्वं	३७	३०९
इतीरिते पङ्क्तिरथेन	६४	५०८	इमे गुणास्तात	६३	४८९
इतीरिते लक्ष्मण	७१	५६६	इमौ कुमारौ	६१	४७५
इतीर्यमाणानि च	८९	७०५	इयं तु भूमिः	७१	५६४
इतोऽपि भूनायकवीर	६३	४९३	इयं महाराज	६८	५४०
इत्थमुक्तवचने	१०	८४	**ई**		
इत्थं क्वचिद्	१४	१२१	ईषच्चञ्चलतुङ्ग	८०	६४४
इत्थं जलक्रीडनं	७८	६२४	**उ**		
इत्थं महामन्मथ	८०	६४१	उदग्नि भागे सरयू	२	१५
इत्थं मुनिक्रतुं	५०	४२०	उदयति हिम	७९	६२९
इत्थं समासादि	४२	३४९	उदयस्य गिरेः	८१	६५०
इत्थं समस्तविबुधानन	४१	३४३	उदयाभिमुखे च	८१	६५१
इत्थं सर्वा मन्मथ	८१	६४८	उद्याने यत्र दोला	६	५५
इत्यादितः सकलं	५९	४६५	उद्याने रामचन्द्रो	७४	५९७
इत्याभाषणरूप	४३	३५३	उपवेश्य तानुचित	१८	१६०
इत्याभाष्यवचो	१९	१७५	उभौ प्रमाणेंगित	६१	४८९
इत्युक्त्वा तत्पाणितः	८६	६८८	उभौ यदृच्छागत	६१	४७६
इत्युच्यमाने समुपा	८५	६७७	उरुतारहाररुचिरा	१५	१२८
इत्युदीर्य विरराम	१०	८७	उरोजभूशाल्य	६७	५३१
इदं तु गाधेयमतेन	६६	५२४	**ऋ**		
इदमित्थमिहाचरेद्	२२	१८५	ऋतुषट्कसुमैः	२३	१९६
इदं विचित्रं	७१	५६५	ऋष्यशृङ्गमुनिनासह	१९	१७४

ए		
एतन्निशम्य वचनं	५९	४६६
एतादृशीं समवलोक्य	५८	४५९
एवमष्टहरितां	११	९८
एवं महाराज	८८	६९८
एष तेनात्यन्त	८६	६८७
एहि देहि देहि	३९	३२२
ओ		
ओर्गण्टिलक्ष्मण	७	१
,,	१४	२
,,	२०	३
,,	२६	४
,,	३५	५
,,	४३	६
,,	५१	७
,,	६०	८
,,	६९	९
,,	७५	१०
,,	८६	११
,,	९०	१२
ओष्ठं तु बिम्ब	५५	४३९
ॐ नमस्ते भगवते	३६	३०३
क		
कण्ठस्तु कम्बु	५५	४४४
कथं समाचार इति	६४	५०७
कदाचिन्न्यस्त	६२	४८५
कदापि देव तावत्	३४	२९३
कदादि स कस्य	६४	४८७
कनकप्रतिमे कृपां	२२	१९३
कनकप्रभं पृथुक	१५	१३२
कमलाकलितश्च	४१	३४१
कमलं बभौ	१५	१२७
कयाचित्तुङ्ग	७७	६०८
कयापि काचित्	७६	६०३
कयापि गूटे	७६	६०६
करप्रचेयान्यथ	७३	५८५
करवाण्यथ किं	२३	१९५
करुणां कुरु मयि	२९	२५१
करोज्ज्वलद्	६५	५१६
कलकण्ठि विकुण्ठित	२२	१८९
कलहंसजालमपि	१५	१३२
कलहंस पंक्तिकल	१५	१४२
कलिङ्गवङ्ग	६३	४९२
कल्लोलचञ्चत्	७८	६१७
कवाटदन्तच्छद	४	३९
कश्यपोऽस्य तनयस्तु	८	६२
काचनाभिनयम्	८०	६४६
काचित् स्वकान्तेन	७६	६०४
कादम्बिनीधृत	१३	११९
कान्तिनिर्झरधराः	१२	१०८
कारण्डवां भान्ति	७३	५७९
कासांचिदासन्	८८	७००
किमतः परमत्र	२३	२००
किमये नृपते	८५	६८०
किमर्थमत्रागमनं	६२	४८०
किमु धावसि कम्बु	२२	१९२
किमुवाच्यमिति	४०	३२६
किं किंकरीमिव	८१	६४९
किं तत्र चित्रमवनी	५२	४२४
किरणमालिनि	७९	६२८

कीचकाः बत पर	१०	८३
कुन्दप्रसूता स्मितं	७३	५८१
कुन्दवृन्ददन्त	३४	३१७
कुमुदैः विभाति	१६	१४१
कुलशीलसंपद्	१८	१५६
कुशध्वजस्वायत	६६	५२३
कुसुमानि फलानि	२४	२०८
कुसुमवृष्टिमुचो	४५	३६९
कुसुमवृष्टिरभूद्	५०	४१९
कृतचतुर्दश शोभि	४६	३७५
केचन प्रमथिताः	११	९३
केतकीदलमहो	१३	११२
केलीगृहस्तम्भ	५	४४
केलिभूमिघरम्	१२	१०७
केषांचिदङ्गानि	८०	६४०
कौसल्याथ	८०	७०९
क्रीडानगाग्रार्पित	४	२९
क्व नु ममापि	४४	३९३
ग		
गङ्गातुङ्गभङ्ग	३८	३१६
गङ्गे तावकतीर एव	३१	२६६
गङ्गे भृङ्गाङ्गनालि	३०	२६३
गङ्गे मङ्गलदायि	३१	२६५
गजा रथा वीर	६५	५१३
गजाः कुतश्चित्	२	१६
गणिकाः स्वकरैः	२४	२०६
गण्डमण्डलप्रसारि	३८	३१५
गतस्तत्र सिंहासना	७५	५९८
गर्गमुख्यमौनि	३९	३२०
गर्जितप्रकटतूर्य	१२	१०१
गाढं घनालिङ्गित	१३	११३
गिरिविलामभयं	४९	४०५
गुरुमङ्गलोज्ज्वल	१८	१६१
ग्रामाद् ग्रामान्तरं	८७	६९५
ग्रीष्मेऽतिशीतल	५०	४५६
घ		
घनतुङ्गविभङ्ग	१३	११५
घरट्टशब्दैः	४	३७
च		
चक्रुस्तदा सप्त	६८	५४६
चण्डभानुरपि काल	७९	६३२
चतुरङ्गबलेन	२५	२२७
चतुरङ्गबलेन संवृतो	२७	२३४
चन्द्रः कलङ्की	४	३४
चराचरे सुरासुरैः	३४	२९५
चारुचक्षुरपि	१०	७९
चित्रमत्र जलदैः	१२	१०४
चित्रं यत्र प्रमुग्धा	६	५३
चित्रं यदुद्यान	३	२४
छ		
छायामुपाश्रित्य	७७	६०७
ज		
जगदीशकृता त्वया	४०	३३०
जंघाद्वयं जयति	५८	४५७
जटिला अपि चोर्ध्व	३२	२८१
जननाथ पश्य	१६	१३९
जनैर्दूरे धीरे	३०	२६१
जम्बूकदम्ब	१४	१२०
जलनिर्गमने वर	१५	१३०

जले निलीनाः	७२	५७८
जहि पुरस्थसमस्त	५०	४१६

त

तच्चित्रमाप्तमथ	५१	४६८
तत एनमभिप्रणम्य	४१	३३९
ततः करे दर्पणम्	७३	६८७
ततः परं मङ्गलं	६८	५४३
ततः शतानन्द	६७	५३८
ततस्तमः सर्वं	७९	६३४
ततस्तयोः सैन्य	६६	५१९
ततस्तरुण्यः सहिताः	८०	६४३
ततस्तु तत्सैन्य	७६	५९९
ततस्तु ता दूरतरं	७२	५७४
ततस्तु दास्यः	७४	५९४
ततस्तु नाना	७८	६२५
ततस्तु पाणौ	६८	५४१
ततस्तु विश्वनाथ	३६	३०१
ततस्तु सौमित्रि	७१	५५९
ततस्तु हेम	७६	६०२
ततस्त्वयोध्या	६४	५०३
ततः समारुह्य	८४	६६९
ततः सुमन्त्रो	८४	६६७
ततोऽतिवेगेन	७४	५९५
ततो नु गङ्गा	७०	५४९
ततो गृहीत्वा वन	७२	५७३
ततो महीन्द्रस्य	६५	५१२
ततो लतातन्तुम्	७२	५६८
ततो वसिष्ठं च	६४	५०४
ततो विदेहाधिपतिः	६४	५००
तत्क्रमक्रमगतानि	८	६३
तत्पुरातनधराधिप	८	६१
तत्र क्रीडानगोद्यन्	६	५२
तत्र मार्गे कदाचित्	८४	६७२
तत्रारविन्दकुल	४३	३५२
तत्रावतीर्णो	८९	७०८
तत्रावतीर्य प्रविसार्य	७१	५५८
तत्रासौ यौवराज्यं	८९	७१३
दत्रैव कविबन्दि	८२	६६५
तत्रैव हेमन्त	७०	५५१
तथापि लक्ष्मीश	१	६
तथेत्यनुज्ञां प्रतिलभ्य	६४	५०२
तदत्र बालोऽयम्	६३	४९०
तदनन्तरमत्र	३३	२८८
तदनन्तरमादान्विता	२२	३८७
तदनन्तरमृष्य	२८	२४३
तदनन्तरमेत्य	३१	२६९
तदनु केकयराज	४९	३६८
तदनु गर्भमधुः	४४	३६०
तदनु जाङ्गलिकस्य	४७	३९०
तदनु दीक्षितमेष	५०	४१३
तदनु दूरतरं	४९	४०२
तदनु पायसपात्र	४४	३५९
तदनु पुष्पमुचो	४९	४११
तदनु वाचमुवाच	६७	३८६
तदप्यहो पुण्यवशेन	६२	४८८
तदद्भुतं संसदि	५४	४९९
तदवशिष्टबलं	५०	४१८
तदाकृतं कार्मुक	५३	४९८
तदा दशरथो	८९	७१२
तदाभवत्	८८	७०१

तदा भार्गवो व्यर्थं	८६	६८९
तदा स कान्ता	८९	७०६
तदा समस्ता वन	७२	५७२
तदिह राजवरेण्य	४७	३८८
तदिहाद्य यस्य	१८	१६५
तदिहानयस्व मुनिपुत्र	१९	१७३
तदीयसेवासमयं	७२	५७०
तदुदितं विनिशम्य	४७	३८९
तदुपप्लवहेतुम्	११	१७९
तदुपागमत्तोत्तरक्षणं	२५	२२५
तमर्घ्यपाद्यादिभिः	६१	४७३
तमिमं महापुरुष	१९	१७२
तमिहानय भूपते	२१	१८२
तं भूपतिं दशरथः	२६	२३१
तं विसृत्य	१०	८८
तं वीक्ष्य राजा	८५	६७८
तरणे प्रतिभूः	२९	२५२
तरुणारुणदीप्ति	२९	२५४
तरुणीव रागि	१६	१४०
तरुण्यनुह्लाद्य	६१	४७८
तव तेन समागमात्	२५	२२१
तव दुर्नयेन	२१	१८०
तव मूलतल	३१	२७१
तस्मिन् गते दशरथः	८७	६९४
तस्य वंशजनितो	८	६५
तस्य सूनुरभवद्	८	८६
तस्य सूनुरसंमज	८	६४
तस्या अभिप्रायमसौ	७३	५८९
तस्यालवालजलतां	५६	४४०
तस्याः सनीपम्	७८	६१९

तापः किमर्द्धम्	४२	३५०
तामथ साधुवाचम्	८७	६९३
ताम्प्यथानुजगृहे	६०	४५९
तां तादृशीमुप	५८	४६०
तास्तदा मदन	८०	६४५
तुरगानुपारुरुहुः	१६	१३६
तुलसी जलशीत	३२	२७३
तुलसी वलमालिका	३२	२७९
तुलसि स्वजनानु	३१	२७०
तेन दिग्विजय	८	६७
तेऽपि प्रसन्नहृदयाः	६०	४७०
त्रिदशागमनाय	२८	२४६
त्वद्वक्त्रभानु	५६	४४८
त्वदुत्सङ्गे गङ्गे	३०	२६२
त्वं विशिष्य सुहृदः	१०	८२

द

दक्षयज्ञशिक्षणाय	३९	३२१
दत्वा देयं सुताभ्यः	६८	५४७
दया कदाचित्	६२	४८६
दशरथस्तु निजात्मजम्	४६	३७६
दशरथस्य मनो	४४	३६१
दिगन्तदेशेश्वर	७०	५५०
देव त्वदीयचरितं	४२	३४५
देव देव देव भाव	३९	३१९
द्रुतमुपेत्य मुनिः	४९	४१२
द्वयोः समानं	७३	५८०
द्विरेफगीतैश्च मयूर	१३	११७

ध

धनुरेतदेष	८६	६८५

न

नटभटगायक	८१	६५५
ननु चन्द्रकले नयापि	२२	१९१
ननु चम्पकवल्लि	२२	१९०
ननु वो विदितं	४१	३३५
न भुनक्ति नो	१८	१५७
नमो भूयो भूय	३७	३१०
नमो भूयो भूयो	३८	३१३
नरपते बहुभाग्य	४४	३५६
नरस्य लोकोत्तरं	६२	४८३
नागरानुगायन्	११	९२
नाभिर्विभाति	५७	४५३
नारायणा खिलजना	४२	३४६
निगमान्तवनान्त	३३	२८६
निगृह्णानो नाना	३७	३११
निजबोधमनु	३२	२७५
निजभाषणनाद	४१	३४२
नितम्बिनीतुङ्ग	८०	६३९
नित्योऽपि नित्य	४१	३४४
निवेदयामि मानसं	३४	२९६
निशाचराणां वधमा	६४	५०५
निश्चिन्तमद्य	४३	३५१
निश्वासोपहित इव	१३	११४
निस्तेजस्कस्ततो	८७	६९१
नीलाम्बुदोपमतनुं	५२	४२२
नूनं तमः प्रतिदिशं	५३	४३०
नृपते स्मरस्युत	१९	२६६
नृपवितीर्णवचा	४८	३९५
नैल्यमाप मुखतः	१२	१०३

प

पठन् गङ्गाष्टकमिदं Extra verse	३१	*
पद्माननां मीन	७७	६१५
पद्मिनी पदयुगं	८१	६४७
पद्मिनीसखम्	८१	६५३
परस्परकरस्पर्शात्	७९	६३०
परस्परस्योपरि	७८	६२०
परानिरष्ठीवद्	७६	६०५
परासखीभिः	७८	६२३
परितः परितुष्ट	१७	१४९
परिपश्यत सर्वपर्वतो	२८	२४८
परिपाण्डुदेहवर	१५	१२९
परेतभूतजात	३४	२९२
पवनेरि ाम्बु	१८	१६२
पशुवृन्दमध्यग	१६	१३३
पश्य चण्डकिरणस्य	१०	८१
पश्यात्र पद्मानि	७१	५६३
पश्चाज्जुगोप चमरी	५३	४३१
पादाश्रितां दशन	५८	४५८
पीताम्वराच्युत	४२	३४७
पुनश्च भृङ्गावलि	७३	५८८
पुनस्तदङ्के	७४	५९२
पुंस्कोकिलालाप	७२	५६९
पुरं समानीय विदेह	६६	५२०
पुरः सारं सारं	३७	३०७
पूर्वस्थितः पश्चिम	३	२२
पूर्वरविश्चन्द्र	८१	६५२
पृथुचक्रवाक	१६	१३५

प्रतिक्षणं भावि	७७	६१३
प्रतिदिनं क्रमशो	४५	३६५
प्रतीरधात्री	७७	६१६
प्रददाति पदे पदे	३३	२८४
प्रददावथ शान्तकन्यकाम्	२६	२२८
प्रदापनं तत्प्रवरानु	६८	५३९
प्रद्योतनेऽस्माभि·	७९	६३३
प्रभो शंभोत्वं	३६	३०५
प्रमदा: कनकप्रभा:	३२	२८२
प्रविसारिदोहज	१६	१३४
प्राकारकाञ्ची	७	५८
प्राकारशृङ्ग	४	३२
प्राकारसौवर्ण	५	४१
प्रासादः शृङ्ग	४	३०
फ		
फणीन्द्रकंकणे	३१	२९१
फलफलध्वानैरेतद्	६३	४९७
ब		
वटुरपि अनुभूय	२०	२१०
बभौ नभोमध्यगा	१३	११६
वलमिदं भुजताल	४९	४०७
वहुमानपुरःसरं तदानीं	२७	२३६
वहुसहस्रगणै:	५०	४१४
वहुसुन्दररूपसम्पदो	४०	३३१
बाणोऽयं त्वच्चाप	८७	६९०
बाल्यस्य सन्धिः	५०	४२८
वृहस्पतिस्तु दैवतै:	३६	३०२
भ		
भरणं कुरु मे	२९	२५५
भवतां द्वितयं स्पृशाम्यहं	२५	२१८
भवत्ययींध्यारिजनै:	१	२
भवनं ननु बिन्दुमाधवस्य	४१	३३७
भवेत् कदाचित्	६२	४८४
भिल्लैः प्रफुल्लोद्गत	७०	५५४
भूरि सैन्यपद	११	९१
भुवनसंभरणाद् भरतो	४५	३७२
भूनायके कनकं	१४	१२३
भृङ्गाङ्गना भृङ्ग	७३	५८३
म		
मकरिकाकृतिपत्र	४५	३६३
मदीयभाग्येन समागतो	६६	५२२
मधुप्रधानसमर	८०	५३८
मनोवच:स्वकर्मभि:	३४	२९७
मन्त्रिवर्यमुपनीय	९	७६
मन्दुरार्पितमहोन्नत	११	९९
मन्मथोऽपि च	८०	६४२
मन्ये यदीयनिटिलं	५३	४३२
मन्ये विदेहतनया	५५	४४३
मम कृते क्व नु	४६	३८२
मम सन्ततिहेतुभूत	२७	२३८
मरणार्थसमेत	२९	२५३
मरन्दमिश्रीकृत	७३	५८६
मरुतो मनसोऽपि	२६	२२४
मरुद्विशीर्णाखिल	७१	५६१
महेश्वरस्य धनुषः	५८	४६१
मार्गे चास्मिन्	८५	६७६
मित्रशात्रवगतं	९	७१
मुकुटापटयुअ्	३२	२७८
मुखतस्तृण	१४	१२२

मुनयश्चुबुकेषु	२३	२०४
मुनिकुम्भपूरण	१९	१६७
मुनिसूनुरपि	२३	२०२
मुने व्रजन्त्यद्य	६४	५०१
मुमुदिरे तमुदीक्ष्य	४६	३७७
मृगवृन्दमत्र वनराजि	१७	१४५
मृडं मार्गं मार्गं	३८	३१२
मृदङ्गपटह	८९	७०७
मृदङ्गवीणापण	६५	५१४
मेघवारण	१४	१२४
मेघं समारुह्य	४	३६
मेधामनुं संनिविश्ये	१	३

य

यत्कण्ठनालविवरं	५५	४४२
यत्र कुत्रचिदपीह	१०	८६
यत्र क्रीडागिरीणाम्	६	५४
यत्राङ्गनावारि	५	४३
यत्रामरेन्द्रावसथ	६	५१
यत्रामरोद्यान	५	४८
यत्रोच्चहर्म्याग्र	३	२०
यत्रोल्लसच्छुभ्र	४	३८
यत्सौधबद्धध्वज	५	४५
यत्सौधवातायन	४	३३
यत्सौधशृंग	३	१९
यत्सौधशृंगार्पित	५	४६
यद क्षत्रियाणां	८५	६८१
यदि कदाचिदियं	४९	४०८
यदीयरथ्यासु च	३	२३
यदीयसौधाग्र	५	४२
यदीय सौधीय	३	१९
यदीयहट्टे विशदां	३	२७
यद्गेहनाना	३	२१
यद्वलबहुदौहृद	४९	३६६
यस्माद् बभूव	५२	४२६
यस्मिन् पुरे	२	१७
यस्मिन् पुरे निर्जर	५	४९
यस्मै वरः सत्	२	१३
यस्य प्रभोर्निष्क्रमणे	८४	६६९
यस्य प्रयाणे	८४	५७०
यस्य प्रवेशे	८८	६९९
यस्या नितम्बयुगलं	५७	४५५
यस्या नितम्बवर	५७	४५३
यस्या भुजौ तु	५६	४४५
यस्यावलित्रयमहो	५७	४५१
यस्याः परस्परनिवेश	५६	४४९
यस्याःप्राकार	७	५७
यस्याः सकाशादधरा	२	१४
यस्यास्तनू रुचिर	५६	४४७
यस्यास्तु कुन्द	५५	४४०
यस्यास्तु मध्यम्	५७	४९२
यस्याः सुवर्णरचिता	५६	४४६
यामामनन्त्यन्य	१	११
यामेत्य दारिद्र्य	५	४०
या वर्णिता संश्रित	१	७
ये तत्र वेगेन	७०	५५६
ये मामुपाश्रित्य	२	१२
योषितामहिम	७९	६३५

र

रघुपतिरधिगत्य	९०	७१४
रघुपतिरसौ तात	६०	४७१
रघुवरमन्मथ	८२	६५७

रघुवीरदीनबन्धौ	८२	६५९
रणचण्डकरः	४०	३२५
रत्नप्रभाधूत	४	३१
रथवाजिभूरि	१५	१२६
रमयते जगतीतल	४९	३७१
रम्भास्तम्भसमीप	८८	६९७
रविकुलकैरवबन्धौ	८२	६५८
रविकुलोद्भव राज	४८	३९८
रविः प्राद्रवत्	७९	६३१
रविणा पुनरेत्य	८१	६५४
रविरातनुते	४०	३२५
रसालगं पल्लव	७२	५७६
रसालभूतस्य	७३	५८४
रहसि जिघ्रति स्म	४५	३६४
राकामहः पर्वणि	७६	६००
राघवकरुणासिन्धो	८२	६६०
राजा दोषाकरः	७९	६३७
रागोल्लसत् किं	७२	५७५
रामोऽपि तत्र दृषदि	५९	४६७
रिपुवधं कुरु राम	४९	४१०

ल

ललनासु राजहंस	१७	१४४
ललाटपाली	७७	६१२
लावण्यतोऽन्यवनिता	५३	४२९
लोकनाथ तत्र	१०	८५
लोकबन्धुकुलजं	९	६९
लोके कलाज्ञेन	७९	६३६

व

वदति तत्र मुनौ	४९	४०९
वदनगन्धविनिर्जित	४९	४०६
वधूवरान्योन्य	६८	५४५
वधूवरान् प्रत्यधुः	६७	५३७
वनवद्भवनं	२४	२१३
वनिता बटवे ददुः	२४	२०९
वयमेकपदेन निश्चला	२४	२१२
वयसा विशीर्ण	१६	१३७
वरसप्तपर्ण	१६	१४३
वराः कुरंगा रुरव	७०	५२५
वरुणादिसुराभि	२९	२५६
वर्षकालमिव	१२	११०
ववृधिरेऽशिव	४६	३७३
वसिष्ठमुख्यद्विज	६५	५१७
वहति नागसहस्र	४९	४०४
वाचि विचारं	८६	६७५
वापीपयः स्वच्छ	७२	५७७
वामस्येयं बाहो	८५	६७४
विचलकलतरङ्गे	३०	२६०
वितेनतुर्द्वौ	६७	५३६
विदार्य सर्वावयवान्	७१	५६०
विदितं भवद्भिः	१८	१६३
विधिवदाहितं	४६	३७४
विनद्य नाना	६७	५३४
विनीलमेघाः	८८	७०३
विबुधास्त्वरया	३३	२८९
विलंध्य सर्वावयव	६५	५१८
विलम्बिमुक्ताफल	६७	५३२
विलासिनीनां गमनं	७८	६१८
विवसना विशिखाऽऽड	५०	४१५
विविधशालिमुख	१७	१४४

विवोढुकामो जनकस्य	६४	५०६
विशदप्रकाशधर	१७	१४६
विशिखेन तेन	१९	१६८
विशुद्धनानाविध	३	२८
विशुद्धनानाविध	६७	५३४
विषुद्धमुक्ताः	६८	५४४
विशुद्धमुक्ताफल	६७	५३३
विश्वजिन्मुख	९	६८
विहायसोड्डीय	७१	५५७
विहारमेतादृशं	७४	५९३
वीणास्वरैः परभृतैः	५५	४४१
वृत्तोरुवक्षोरुह	७७	६०९
वृषभाः परस्परमुपोप	१७	१४७
वैद्युतद्युति	१२	१०२
वैरिवृद्धिमभितः	११	९०
वैषम्यवैरस्य	२	९
व्याघ्रैर्गावः	६	५६
व्यायामेयपयो	८४	६७१
व्यास्थं न वेदान्	१	५

श

शत्रुमित्ररिपु	१०	८०
शत्रुवक्त्रपरिदष्ट	११	९५
शमितोल्मुकदत्त	३२	२८०
शरणं भव विश्व	४३	३३२
शरदः श्रियं	१६	१३८
शुकपञ्जरप्रकर	१७	१५३
शृणु गारुडरत्न	३१	२७२
शृणु नो वचनं	२५	२२०
शृणु मे मुखतो	२१	१७७
शृणुष्व राजन्नव	६२	४८२
शृणु सुबाहु	४७	३८७
श्रमात् परिखिन्न	७७	६१०
श्रीचमत्कारलहरी	२६	४
श्रीरामचन्द्र यदि	५६	४६४
श्रीरामोज्ज्वल	८२	६५६
श्रीविश्वेश्वर	३५	३००
श्रुत्वा वचः द्रौपदि	५८	४६३

ष

षड्गुणा इह	९	७२

स

स आदितस्तादृग्	६२	४८१
स कदाचिदुवाच	२७	२३७
स कलराजधनाद्य	४७	३८४
संगरेषु बहुधा	१२	१०५
स च राजशिरो	२८	२४०
स च वचोऽभि	४८	३९६
स च हुताशनतः	४४	३५५
संजिगाय समदृष्टिः	११	९७
स ततः कलभाषणेन	२३	२०५
स ततो न विकारम्	२४	२०७
स तत्रापि गत्वा	८६	६८४
स तथेति विमृश्य	२७	२३९
स तदेव मनोगतं	२४	२२५
स तथैव विधीयताम्	२२	१८६
स तमुवाच मुने	४८	३९४
स तु मां निरीक्ष्य	१९	१६९
सदा कलत्रपुत्र	३४	२९४
सदा स वेदान्त	६५	५१०
सदैव देव देव	३३	२९०
स निपपात विशीर्ण	५०	४१७

सपदि तूर्णमगमत्	४८	४००
स पुरः सहस्रविलोक	२३	२०३
सफलमद्य जनुर्मम	४६	३८१
समवलोक्य तुतोष	४५	३६२
स मया बहु	४१	३३६
समागत्य तदा	८९	७११
समानवेषैश्च	७०	५५३
समुचितेषु दिनेषु	४५	३६७
समुनिं सवधुं	२८	२४१
समुनिः खलु	२९	२३०
समुपवेश्य विचित्र	४६	३८०
स यक्षविद्याधर	६३	४९६
सरणिस्तव देवि	२९	२५७
सरयूत्तरतीर	२८	२४४
स वसिष्ठमुनीश्वरेरितं	२१	१७६
स वासरान्	८४	६६६
स विचिन्तयन्निव	१८	१५८
स विभाण्डकसन्मुनि	२६	२२९
स विभाण्डकसूनु	११	१८१
स शिल्पिशैलूष	६५	५१५
स सोमवंश्यो	६५	५०९
स खेलति स्म	५३	४२७
सानुरागवृतया	७९	६२७
सीत्काररोमाञ्च	७१	५६२
सुखततेर्मम	४७	३८३
सुतजतोरनियन्	४५	३७०
सुधागृहैरुज्ज्वल	४	३५
सुप्तो यथाहिः	८६	६८६
सुराधीशे नीशे	३७	३०८
सुवर्णपीताम्बर	६१	४७७
सुवर्णभास्वत्तर	६६	५२८
सुवृत्ततुङ्ग	७७	६११
सुवृत्तबाहोः	६७	५२९
सूनचन्दनविभूषण	७८	६२६
सूर्याश्वविश्रान्ति	३	२६
सेतुशीतनगर्याः	८	६०
सेयं मया मखततिः	५२	४२३
सोऽपि प्रसार्य	५१	४२१
स्खलिता खलु	२२	१९४
स्वतोऽपि वैदेह	६६	५२७
स्वनिकेतनं विशद	२४	२५२
स्वप्ने साक्षात्	९०	७१६
स्वसंसारं घोरं	३७	३०६
स्वामिन्नेतच्चरण	८७	६९२
स्वाहा स्वधावषट्	३६	३०४
ह		
हठात् समुत्थाय	७४	५९१
हरणं कुरु दूति	३२	२७४
हरणीयमघं ममेति	२९	२५८
हर्षवत्यवनिपः	१३	१११
हस्तिनोऽपि परितो	१२	१०६
हस्तिवाजिरथ	१०	८९
हेमन्ततत्प्राप्त	७१	५६७
हे सुमन्त्र	९	७७

——:0:——

शुद्धाशुद्धसूची

पृ.	पं.	अशुद्धम्	शुद्धम्
VIII	21	17th	14th
२	७	सौन्दयतो	सौन्दर्यतो
५	२	प्रकारण	प्रकारेण
६	१४	°द्युतकपट	°द्युतिकपट
१२	६	नैल्यमापमुखतः	नैल्यमाप मुखतः
१३	१३	द्विरफगीतैश्च	द्विरेफगीतैश्च
१३	१४	विद्यल्लुलना	विद्युल्लुलना
१४	११	विचिन्तयं	विचिन्तयं–
१६	१७	कुमुदेर्विभाति	कुमुदैर्विभाति
२५	४	स्पृशाति	स्पृशति
२७	१८	भाग्यैःरनु	भाग्यैरनु
२९	१०	समस्थलाकाभरणं	समस्तलोकाभरणं
३०	१६	संगीत भङ्गी	संगीतभङ्गी
३२	५	भेरवो	भैरवो
३६	१८	°पनुद्येवमव	°पनुद्यैवमव
४१	३	वजतेहैव	व्रजतेहैव
४१	१४	त्रि वेपु	त्रिदिवेषु
४३	१७	°साक्षात्कारोः	°साक्षात्कारो
४६	५	°विमिन्नसरस्वती	°विभिन्नसरस्वती
४८	७	भ्रकुटि	भ्रुकुटि
५२	१४	र्वभाषे	बभाषे
५४	१	°व्रिहारआद्रम्	°विहारकाव्यम्

पृ.	पं.	अशुद्धम्	शुद्धम्
५४	२	°म्बि	°म्बि°ग
५६	१४	बहुदीघ	बहुदीर्व
५७	४	°दुगभूमौ	दुर्गभूमौ
५७	२०	वरिष्यति	धरिष्यति
६१	१०	कयाट	कवाट°
७१	१६	°याप्तेव	°व्याप्तेव
७४	३	तङ्कदेक्षाद्	तदङ्कदेशाद्
७६	१४	भवेरदृष्टस्य	भवेददृष्टस्य
८२	२	४८	५८
८२	२२	५७	६७
८४	३	मान्भिप्रवर	मन्त्रिप्रवरं
८९	१४	बर्धस्व	वर्धस्व

Note —*The word* सर्ग *should be substituted for* अध्याय *in the* अनुक्रमणिका *throughout and the whole should be read as* प्रथमःसर्गः, द्वितीयःसर्गः *etc.*

——(:o:)——